[illegible] एकमूर्त्तिरपि भिन्नरूपिणी या जगत्त्रितयपालनक्षये काचिदीश्वरतया विवर्त्तते ब्रह्म
शक्तिमहतां नतोस्मि ताम् १ श्रीचतुर्भुज[illegible] तां धराम् तां धरां चंडिकाचरित्रे विविच्यते धीरसार्य दृष्टु
ष्यतां यतः कीरगीरपि सतां विनोदिनी २ प्राक्किल भगवद्बादरायणान्तेवासी जैमिनिर्महाभारत विषयेषु केषुचि
त्पदार्थेषु संदिहानो मार्कंडेयमहर्षिमुपगम्याप्राक्षीत् अयं नायमस्माकं कथादानाः सर्वार्थाभिज्ञानात् विंध्या
चलनिवासिन श्चतुरः पक्षिणः पृच्छेति मुनिनोपदिष्टस्तांश्च पप्रच्छ तथैवाकार्षीत् स्वयमुपेक्षणे पक्षिणां समीपे जैमिनेः प्रेषणे य
तो मार्कंडेयस्यायमभिप्रायः बादरायणशिष्योप्ययं बादरायणमनुवर्त्तमानः कर्मणस्तावन्न मन्यते यतः सर्वकर्मफल
दातरि परमेश्वरे फलमत उपपत्तेरित्यनेन प्रतिपादिते धर्मं जैमिनिरत एवेति तत्स्य विप्रतिपत्तिः तथा तदुपर्यपि बा
दरायणः संभवादित्यनेन कर्मानधिकारिणामपि देवतिर्यगादीनां ज्ञानाधिकारे प्रतिपादिते मध्वादिष्वसंभवा
दनधिकारं जैमिनेरिति तत्स्य विप्रतिपत्तिः अतस्तिरश्चां कर्मानधिकारिणां शिष्यीभूत्वा तेषां ज्ञानाधिकारं जा
नन् सर्वज्ञ बादरायणमते विश्वस्तो भवत्विति देवतातिर्यग्मनुष्यादीनां च विग्रहवतां चेतनानां संग्रामादिक

अष्टवर्णनीयं तत्रापि तु रश्मिनिवेशं त्वद्यतीति पुनश्च जैमिनिप्रश्नानुरोधात् स्वर्गादिपुराणं गव्याख्यानावसरे तु शेषपुराणं गव्याचिख्यासया मार्कण्डेयभाग्
रिसंवादात्मकमिति ह्यासमनुवर्णनीयं ततोऽष्टममन्वन्तरस्य प्रक्रममाण धर्मपक्षिण ऊचुर्मार्कण्डेय उवाचेति मृकण्डोरपत्यं मार्कण्डेयः मंगलार्थश्चा
यं चिरंजीविनो ग्रन्थादावुपन्यासः सावर्णिरित्यादि सवर्णाछायायास्तस्या अपत्यं सावर्णिः वक्ष्यादित्यादि न्यायं पहलुब्जजस्य वैवस्वतमनोः समानोः
वर्ण इति सावर्णिः स्वार्थे तद्धिताभिधानात् तथा च विष्णुपुराणे छायायां संज्ञासुतो योऽसौ द्वितीयः कथितो मनुः पूर्वजस्य सवर्णोऽसौ सावर्णिस्तेन क
थ्यते सूर्यतनय इति दत्तसावर्ण्यादीनां निरासार्थं यः सावर्णिरष्टमो मनुः कथ्यते तदुत्पत्तिं निशामय जानीहीत्यर्थः निशामय इति शमालोचना

सावर्णिः सूर्यतनयो योमनुः कथ्यतेऽष्टमः। निशामय तदुत्पत्तिं विस्तराद्गदतो मम॥ ॥२॥

लोचने इत्यस्य चौरादिकाद्रूपं शमोऽदर्शने इति दर्शनेतरविषयत्वे मित्संज्ञानुबंधसंज्ञाविधानात् ह्रस्वाभावः तदुत्पत्तिमिति वाच्यवाचकाभेदाभिप्रायेण
विस्तरात्प्रपंचतो गदतः कथयतः ममेत्यपवादविषयेऽपि दुस्त्यज्यासमावेशात् पंचम्यर्थे षष्ठी अथवा पंचम्यंतं यद्वा मम विस्तरान्ममशाद्प्र
पंचात् विस्तरो विग्रहो व्यासः स च शब्दस्य विस्तरः इत्यभिधानात् ममसकाशात् ममगदतः मम वचनात् गदतो नेने तिगदो मुखं मदीयव
चनात् गदनं गदो वचः प्रयोजकः तदंताम् तस्स ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

महामायेति विषयविसदृशप्रतीतिसाधनं माया तस्यां च महत्त्वं सर्वविषयत्वमिति महामायेश्वरशक्तिः सैव हि प्राणिनो मोहयति तस्याः अनुभावेन इदमस्मदीयमित्यादिरूपेणानुकूले तया यथा येन प्रकारेण मन्वंतरं किंचिदधिकैकसप्ततिचतुर्युगात्मककालः तस्याधिपो राजा वभूवेति भाविनि भूतवदुपचारात् तथा तं प्रकारं निशामय तत्तु षंगः यत्तदोर्नित्यसंबंधात् महान् असाधारणो भागो भगः समुदायो यस्य स च ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना इति विष्णुपुराणोक्तेः रविस्तनयः सावर्णिरिति संभ्रमे पुनरुक्तिः तत्रानिद्रासमव

महामायानुभावेन यथा मन्वंतराधिपः स बभूव महाभागः सावर्णिस्तनयो रवेः १ ॐ नमो भगवत्यै नमश्चंडिकायै ॥ ॥
स्वारोचिषेंऽतरे पूर्वं चैत्रवंशसमुद्भवः सुरथो नाम राजाभूत्समस्ते क्षितिमंडले ३ ॐ नमः पार्वतीपतये नमः शिवाय ॥ ॥

तारयति स्वारोचिष इति स्वरोचिषोऽपत्यं स्वारोचिषः स्वारोचिष इति स्वारोचिषो नाम द्वितीयो मनुः तदधिकारोपलक्षिते स्वारोचिषे काले यद्वा स्वारोचिषस्य इदमिति तस्येदमित्यण् अंतरे समये द्वितीयमन्वंतरे इति यावत् मन्वंतरं मनोः कालः इति विष्णु राम
पुराणवचनात् पूर्वं कथाकालापेक्षया चैत्रो नाम स्वारोचिषमनोः सूनुः तस्य वंशे संततौ समुद्भवो जन्म यस्य नामेति प्रसिद्धौ
सुरथसंज्ञया प्रसिद्ध इत्यर्थः ॥ ३ ॥

त्स्येत्यादि सम्यक्नीतिशास्त्रानुशारेणप्रजाः लोकान् औरसान् धर्मपत्न्याप्रभवान् पुत्रानिवपालयतः कोलेति काचिद्राजधानीतांविध्वं
सितुंअधासितुंशीलंयेषांविशाब्देनधातोरत्याथीकरणात् तेनकोलाविध्वंसिनः कोलानिवासोभूपाः तस्यशत्रवोविपक्षावभूवुरित्यर्थः
तथाताहशाअद्विकाद्रानियावत् तदेतिवाचार्थः अथवा कोलेति सरथस्यैव राजधान्यंतरंतांविध्वंसितुंमुपमर्दितुंशीलंयेषांतेतस्यशत्र
वोभूपाः स्तथाबभूवुः यथाकोलाविध्वंसिनइत्यर्थः अथवा तदाततकालेतस्यशत्रवः कोलाविध्वंसिनोबभूवुः कोलाविध्वंसिवंत
इत्यन्वयार्थो यद्वाकोलाः शूकरास्तान्नविध्वंसंतिनत्यावादंतीतिव्रताभिधवक्त्रेतिशीनिः यवनाइत्यर्थः कोलाशब्दविशेषः तयावि

तस्य पालयतः सम्यक् प्रजाः पुत्रानिवौरसान् बभूवुः शत्रवो भूपाः कोलाविध्वंसिनस्तदा ४ तस्यतैरभवद्युद्धमतिप्रबलदंडिनः न्यू
नैरपिसतैर्युद्धे कोलाविध्वंसिभिर्जितः ५ ततः स्वपुरमायातो निजदेशाधिपोभवत् आक्रान्तः समहाभागस्तैस्तदाप्रबलारिभिः ६
((अमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्यदुरात्मभिः कोशोबलंचापहृतं तत्रापि स्वपुरे ततः ७ ॥ ॥

ध्वंसितुंशीलंयेषांते कोलाशब्दप्रभेदस्य
दित्यजयकोपइत्यन्वयः तस्येति युद्धंसंप्रहारः दंडोहस्त्यादिसमूहः अतिशयेनप्रबलः प्रचितोदंडोविद्यतेयस्यसः तस्य अथवाअत्र
चितदंडकारिणः न्यूनैरल्पसाधनैरपितैः तस्थोजितः भंगेनयोजितः जयभंगयोर्दैवाधीनत्वात् ५ ततः स्वपुरमित्यादि ततः स्वपुरमि
त्यादि ततोऽनंतरं स्वपुरमात्मराजधानीमूलराजधानींवा निजदेशाधिपोमूलराष्ट्राधाक्षः आक्रान्तोभिभूतः आछिन्नदेशोवा ततस्तैरा
क्रांतः स्वपुरमायातोनिजदेशाधिपोभवदित्यन्वयः तदाप्रबले तत्कालप्राप्तप्रबलैः अरिभिरित्यर्थः ६ अमात्यैरित्यादि ततस्तस्याप्रा
क्रांतः स्वपुरमायातोनिजदेशाधिपोभवदित्यन्वयः तदाप्रबलैः तत्कालप्राप्तप्रबलैः अरिभिरित्यर्थः दुर्बलस्यशत्रुभिः
र्वविभक्तिकालस्य ततः स्वपुरेऽप्यमात्यैः कोशोबलंचापहृतमित्यन्वयः बलिभिः संजातबलैः दुष्टैर्जातप्रकोपैः दुर्बलस्यशत्रुभिः

१

ततो मृगयेत्यादि मृगयाव्याजेन मृगवधच्छलेन हृतं स्वाम्यं आधिपत्यं यस्य सः एकाकी अद्वितीयः गहनं दुर्गमं वनं ८ स तत्रेत्यादि आश्रमं ऋषिनिवासोचितं
स्थानं द्विजवर्यस्य ब्राह्मणश्रेष्ठस्य मेधसो मेधोभिधानस्य प्रशान्तैः परिहिंसाविरतैः श्वापदैः हिंस्रपशुभिः आकीर्णं अभिव्याप्तं मुनेर्मेधसः शि
ष्याः मुनिशिष्याः मुनयो मननशीलास्ते इति वा मुनयश्च शिष्याश्च तैरुपशोभितं अलंकृतं ९ तस्थाविति कंचित्कालं इत्यत्यंत
संयोगे द्वितीया सत्कृतः अन्वयः तेन मुनिना मेधसा सत्कृतः पूजितः इतश्चेतश्चानियतदिग्देशात् मुनिवरेति भागुरेः संबोधनं मेध

ततो मृगयाव्याजेन हृतस्वाम्यः स भूपतिः एकाकी हयमारुह्य जगाम गहनं वनं ८ स तत्राश्रममद्राक्षीद्द्विजवर्यस्य मेध
सः प्रशान्तश्वापदाकीर्णं मुनिशिष्योपशोभितं ९ तस्थौ कंचित्स कालं च मुनिना तेन सत्कृतः इतश्चेतश्च वि
चरंस्तस्मिन्मुनिवराश्रमे १० सोऽचिंतयत्तदा तत्र ममत्वाकृष्टचेतनः मत्पूर्वैः पालितं पूर्वं मया हीनं पुरं हि तत् ११
मद्भृत्यैस्तैरसद्वृत्तैर्धर्मतः पाल्यते न वा न जाने स प्रधानो मे शूरहस्ती सदामदः॥ ॥१२॥

सो विशेषणं वा १० सोऽचिंतयदिति
ममेति षष्ठ्यंतप्रतिरूपकमव्ययं तस्य भावो ममत्वं ममैव इत्यभिमानस्तेनाकृष्टा वशीकृता चेतना बुद्धिर्यस्य मत्पूर्वैर्मदीयप्राचीनपुरु
षैः पूर्वं प्राक्काले पूर्ववद्द्वितीया ११ मद्भृत्यैरिति असद्वृत्तैरिति हेतुगर्भं विशेषणं अत एव धर्मतः पाल्यते न वेति विकल्पः धर्मतः
उचितनीत्या स प्रसिद्धः प्रधानो मुख्यः उक्तलिंगत्यजत्यपीतिन्यायात् मुख्यत्व तथा च रामायणे लंकाकांडे प्रधानाः प्लवंगमाः इति यद्वा राम
प्रधानानि महामात्रास्तैः सहितः सप्रधानः महामात्राः प्रधानानीत्यभिधानात् १२ रामजी ३

ममेति वैरिवशंविपक्षपारतंत्र्यंयातः प्राप्तः कान्किंयतः कीदृशान्वा उपलप्स्यते उपलभ्यनइति नजानेइति साध्याहारोन्वयः अनुगताः
सेवकाः प्रसादस्तुष्टिदानं धनवर्षदेयदानं भोजनंप्रतिदिनदेयं यद्वा प्रसादोऽनुग्रहः धनंप्रीतिदानं भोजनंवेतनं तैर्हेतुभूतैरिति काकाक्षि
वदुभयत्रसंबध्यते २३ अनुवृत्तिंसेवांध्रुवमितिनिश्चितं ते अद्यसंप्रतिअसम्यगिति आयानुरीत्यव्ययः सम्यग्व्ययः ततोऽन्यथा असम्यग्व्ययः
तच्छीले तत्कारिभिः अथवा असम्यग्व्ययशीलैस्तैः दुर्व्यसनव्ययशालिभिः दुःखेनतति दुर्गतं खमिंद्रियं यस्मिन्निति दुःखं दुर्वेशा
तत्पदात्तादिति णत्वप्रतिषेधः सुखदुःखतत्क्रियायामिति धातुपाठात्केचिद्दुःखेनेत्याहुः २४ तत्रेति विप्रेति भागुरेः संबोधनमेथ

ममवैरिवशंयातैः कान्भोगानुपलप्स्यते ये ममानुगता नित्यं प्रसादधनभोजनैः २३ अनुवृत्तिं ध्रुवं तेद्य कुर्वंत्यन्यमहीभृ
तां असम्यग्व्ययशीलैस्तैः कुर्वद्भिः सततं व्ययं २४ संचितः सोतिदुःखेन क्षयं कोशो गमिष्यति एतच्चान्यच्च सततं चिंतयामास पार्थि
वः २५ तत्र विप्राश्रमाभ्यासे वैश्यमेकं ददर्श सः सपृष्टस्तेन कस्त्वं भो हेतुश्चागमनेत्र कः २६ सशोक इव कस्मात्त्वं दुर्मना इव लक्ष्यसे इ
त्याकर्ण्य वचस्तस्य भूपतेः प्रणयोदितम् प्रत्युवाच स तं वैश्यः प्रश्रयावनतो नृपं २७ ॥

तत्रेति सोविप्राणांवा अभ्यासे निकटे सराजा एकं
अद्वितीयंवैश्यंददर्श २५ सवैश्यस्तेनराज्ञा भोइत्यामंत्रणे अत्रआश्रमे इष्टवियोगानुचिंतनं शोकदुःखनिवंधनचिंतावशाद्दौर्मे
नस्यं सशोक इव उपहतशरीरत्वात् दुर्मना इति क्रियाऽस्थिरत्वात् २६ इतीदृशमाकर्ण्य श्रुत्वा प्रणयोदितं विश्रंभेणोदीरितं प्रत्युवा
-वाच प्रतिवचनं दत्तवान् प्रश्रयावनतो विनयनम्रः २७

चं॰ टी॰
४

पुत्रदारैरिति पुत्रैर्दारैश्च चकारात्स्वजनैश्च निरस्तो धिक्कृतो भर्त्सितः इति यावत् असाधुभिरिति हेतुगर्भविशेषणं १८ विहीनश्चेति निकेवलं धिक्कृतो धनमादाय निरस्तो निःसारितः एवमहं धनैर्दारैः पुत्रैराप्तबंधुभिश्च विहीनो वनमभ्यागत इत्यर्थः केचित्तु धनैरिति पुत्रदारैरित्यस्य विशेषणं ते हि मम धनानि तैरेव धनमादाया हं विहीन इत्याहुः आप्ताः सुहृद्बांधवो ज्ञातयः यद्वावृत्तिर्नामालंकारोयं १९ स तथा विधोहं कुशलाकुशलात्मिकां शुभां अशुभां वा प्रवृत्तिं वार्त्तां वार्त्ता प्रवृत्तिर्वृत्तांत इत्यमरः २० तामेव विविच्य दर्शयति किंन्विति किमि

वैश्य उवाच समाधिर्नाम वैश्योहमुत्पन्नो धनिनां कुले पुत्रदारैर्निरस्तश्च धनलोभादसाधुभिः १८ विहीनश्च धनैर्दारैः पुत्रैरा दाय मे धनं वनमभ्यागतो दुःखी निरस्तश्चाप्तबंधुभिः सोहं न वेद्मि पुत्राणां कुशलाकुशलात्मिकां प्रवृत्तिं स्वजनानां च दा राणां चात्र संस्थितः २० किं नु तेषां गृहे क्षेममक्षेमं किं नु सांप्रतं कथं ते किं नु सद्वृत्ता दुर्वृत्ताः किं नु मे सुता २१ राजोवाच॥ यैर्निरस्तो भवाल्लुब्धैः पुत्रदारादिभिर्धनैः तेषु किं भवतः स्नेहमनुबध्नाति मानसं २२ वैश्य उवाच एवमेतद्यथा प्राह भवानस्मद्गतं वचः किं करोमि न बध्नाति मम निष्ठुरतां मनः २३ ॥

ति संदेहे न्विति वितर्के अथवा किं नु इति विकल्पे तेषां पुत्रदारस्वजनानां गृहे कलत्रपुत्रादौ क्षेमं कल्याणं अक्षेमम कल्याणं सांप्रतं इदानीं कथं किंविधः वृत्तं शीलं सु ताः इत्युपलक्षणं दाराः स्वजनाश्चेत्यपि बोद्धव्यं २१ राजेत्यादि यैरिति धनैर्हेतुभूतैः किमिति प्रश्ने भवतः मानसं मनः स्नेहमनुबध्नाति आसंजयति २२ एवमिति अस्मद्गतं अस्मद्विषयं मम मनो निष्ठुरतां पारुष्यं न बध्नाति न भजत इत्यन्वयः २३ ॐ नमो भगवत्यै ॥ ॥ राम
४

यैरिति यैः पुत्रदारैः स्वजनैश्च पितृत्वेहं पतिहार्दं स्वजनहार्दं संतत्येत्यन्वयः निराकृतस्त्यक्तोऽस्मि तेषु तथाविधेष्वपि मेमम मनो हार्दं सस्नेहं प्रवेत्येवकारो भिन्नक्रमे हार्दं इत्यस्यानंतरं द्रष्टव्यः २४ किमेतदिति जानन् ज्ञानवानपि विगुणेष्वपि विरुद्धगुणेष्वपि यच्चित्तं प्रेमप्रवणं तत्तु हानुबंधि पतत् किमिति नाभिजानामि इत्यन्वयः २५ तेषामिति कृते हेतोः निश्वासाः दौर्मनस्यं च मम जायते इति पश्चाद्वचनमन्वयः अप्रीतिषु प्रीतिशून्येष्वपि तेषु यन्मे तेनानतिनिष्ठुरं अप्रीतिमुनिष्ठुर इति पाठे अप्रीत्या मुनिष्ठुरं अतिनिष्ठुरं न जायते इत्यनुषज्यते तत्किं करोमीत्यन्वयः मार्कंडेय इति २६ तत इत्यादि हे विप्र तौ मेधसं समुपस्थिता

पु ४

यैः संत्याजितो लोभाद्धनलुब्धैर्निराकृतः पतिस्वजनहार्दं च हार्दि तेष्वेव मे मनः २४ किमेतन्नाभिजानामि जानन्नपि महामते यत्प्रेमप्रवणं
चित्तं विगुणेष्वपि बंधुषु तेषां कृते मे निःश्वासो दौर्मनस्यं च जायते करोमि किं यन्न मनस्तेष्वप्रीतिषु निष्ठुरं २६ मार्कंडेय उवाच ततस्तौ
सहितौ विप्र तं मुनिं समुपस्थितौ समाधिर्नाम वैश्योऽसौ स च पार्थिवसत्तमः २७ कृत्वा तु तौ यथान्यायं यथार्हं तेन संविदं
उपविष्टौ कथाः काश्चिच्चक्रतुर्वैश्यपार्थिवौ २८ राजोवाच भगवंस्त्वामहं प्रष्टुमिच्छाम्येकं वदस्व तत् दुःखाय यन्मे मनसः स्वचित्तायत्ततां

तो उपसंतौ पार्थिववैश्यसत्तमः साधुतमः २७ कृत्वेति यथान्यायं यथाशास्त्रं यथार्हं यथाचारं तेन मुनिना सह संविदं संभाषां संवित् क्रियां प्रतिज्ञाय माचारे ज्ञाने संकेते संभाषायां क्रियाकाले संकेते नाम्नि भाषते इत्यभिधानात् २८ भगवन्निति एकं वस्तु यन्मनसः स्वचित्तस्वहृदि आयत्तता निरोधं विनामे मम मनसो दुःखाय दुःखकारणं तत् वदस्वेत्यन्वयः गदस्वेति सर्वे विषयाः कं हर्षविकल्पं त

इत्यात्मनेपदं पुराणमपि ऋषिप्रणीतत्वात् छंद एव यद्वा यद्वेनवदलेति यत्नार्थे आत्मनेपदं मनोजयो हि न किमपि नरं दुःखीकरोति २९

संकल्पविकल्पात्मकं मनः निश्चयात्मकं चित्तं अधीनो निघ्न आयत्तः इत्यमरः ॥

५

दु॰
मा॰ टी॰

ममत्वमिति मत्पस्येति मृणां मृणइति सप्तम्यर्थे षष्ठी मम राज्यादौ यन्ममत्वमेतत् किंविवेकं धनमित्यर्थः अन्यच्चाह राज्यस्य राज्यक्रियायां इति राज्यांगेषु स्वा
म्यादिषु स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च राज्यांगानि प्रकृतयः पौराणां श्रेणायोपि च दूतिनाम प्राप्तनात् अखिलेषु समस्तेषु ३०
अयमिति अयं वैश्योनिः कृतो दुःखी भृतः उज्झितस्त्यक्तः तेष्विति समुच्चये अत्यतिशयेन हार्दी स्निहवान् ३१ एवमितिविषयेवस्तुनिपु

म॰

ममत्वं मे राज्यस्य राज्यांगेष्वखिलेष्वपि जानतोपि यथाज्ञस्य किमेतन्मुनिसत्तम ३० अयं च निकृतः पुत्रैर्दारैर्भृत्यैस्तथोज्झितः
स्वजनेन च संत्यक्तस्तेषु हार्दी तथाप्यति ३१ एवमेष तथाहं च द्वावप्यत्यंतदुःखितौ दृष्टदोषेपि विषये ममत्वाकृष्टमा
नसौ ३२ तत्केनैतन्महाभाग यन्मोहो ज्ञानिनोरपि ममास्य च भवत्येषा विवेकांधस्य मूढता ३३ ॐनमोभगवत्यै॥ ॥

त्रनिपुत्रदारादौ ३२ तत्केनेति ममास्य च ज्ञानिनोरप्यावयोर्यन्मोहोऽन्यथाप्रतिभानं भवति तत् एतत् केन कारणेनेत्यर्थः नद्यास्मा द्विधा
नां मोहो भवितुमर्हतीत्याह एषा इति बालुतत्त्वपरिछेदो विवेकस्तेनांधस्य तद्विहीनस्येत्यर्थः अथवास्य अविवेकेनांधस्य चाविवेकि
नइतियावत् एवं भूतस्यैवेत्याह एषा मूढता भवति नतु विवेकिनः तत्कथमावयोर्मोह इति भावः ३३ ॐनमोभगवत्यै॥ राम

५

अथोत्तरमविधायैवज्ञानित्वाभिमानमेवतावदुन्मूलयितुमाह ऋषिरुवाचज्ञानमिति ननुज्ञानमात्रस्यैवमोहवैयधिकरण्यं भवतोऽभि
प्रायात् ज्ञानविशेषस्यवा आद्ये सर्वस्यैवनिर्मोहत्वप्रसंगइत्याह ज्ञानमिति समस्तस्य जंतोः प्राणिमात्रस्यवा विषयगोचरे विषयविषये
घटपटादिविषये ज्ञानमस्ति करणवृत्तिरस्तिनचमोहाभावः इतिनविषयज्ञानस्यमोहवैयधिकरण्यमित्यर्थः द्वितीयेबाधक
माह विषयश्चेति विषयश्च पृथक् भिन्नास्वभावः एवं वक्ष्यमाणक्रमेणायथागोत्वब्राह्मणत्वादिभेदेनजातिः पृथक् पृथक्
भवति एवं घटपटादिविषयस्य पृथक् अभ्युपगतिश्चैतेन चविभिन्नविषयेज्ञानस्यमोहवैयधिकरण्यमुपपद्यते अत्रकोमो क५५

ऋषिरुवाच ज्ञानमस्ति समस्तस्य जंतोर्विषयगोचरे विषयश्च महाभाग याति चैवं पृथक् पृथक् ३४॥
दिवांधाः प्राणिनः केचिद्रात्रावंधास्तथापरे केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टयः ३५

हः कःणोकएकत्वमनुपपन्नइत्यभेदज्ञानस्यैवतत्राभावश्रवणात् जातिश्चैवमितिपाठेयथाघटपटादिविषयस्यपृथ
क्पृथगेवंमनुष्यत्वादिजातिरित्यर्थः गोत्वब्राह्मणत्वादिभेदेनजातिपृथग्भवति यद्यपिजातिरेकानित्यातथापिव्यक्ति
भेदाद्भिद्यते ३४ विभिन्नत्वमेवप्रगटयति दिवेति केचित्प्राणिनः उलूकादयोदिवांधाः विषयेष्वंधाः ऐंद्रियकज्ञानहीनाः
अर्थात्रात्रावनंधाः अपरे वायसादयोरात्रावंधाः केचित्तु किंचुलुकादयोदिवारात्रौतुल्यदृष्टयः अंधाएव तथाकेचि
न्मार्जारादयोदिवारात्रौतुल्यदृष्टयोऽनंधाएवेत्यर्थः एतेनज्ञानमात्रस्यवैयधिकरण्यपराभ्यामादावुलूकादीनांमोह दि५

तस्मान् किंचुलुकादीनां सर्वेषामेव स्यादेवे
ति स्वर्गापवर्गपदत्वाहुति रिति भावः २५

ऋषिनाप्युक्तिः सर्वसत्वानां ज्ञानत्वमभिप्रेतं किंनु मनुष्याणामेवेत्यतस्त्राह ज्ञानिन इति ननु त्वन्मते मनुष्यमात्रस्य ज्ञानित्वं मनुष्यविशेषस्य वा तत्रा
द्यं खंडयितुमुपक्रमते ज्ञानिन इति मनुजाः ज्ञानिनः इति ते मतं सत्यं केवलं मनुजा ज्ञानिन एव न हि किं तु ज्ञानिनो पि इत्यर्थः एवं वा
ज्ञानसंवलितत्वज्ञानिनो पि ज्ञानित्वे वैपरीत्यमेव किं न स्यात् सर्वसत्वानां चाज्ञानित्वं तदवस्थमित्याह यत इति हि शब्दो वधारणे
भिन्नक्रमे यतः पश्वादयो पि ज्ञानिन एवेत्यन्वयः तेषु पि ज्ञाने संवलितत्वं ज्ञानस्य सङ्गावात् पशवो ग्राम्याः गवाद्याः पक्षिणः
पारावताद्याः मृगाः आरण्याः हरिणादयः अथ वा ते मनुजाः केवलं ज्ञानिनो न हि किं तु ते पि ज्ञानिनः सन्तीत्याह यत इति

ज्ञानिनो मनुजाः सत्यं किन्तु ते न हि केवलं यतो हि ज्ञानिनः सर्वे पशुपक्षिमृगादयः ३६

ज्ञानं च तन्मनुष्याणां यत्तेषां मृगपक्षिणाम् मनुष्याणां च यत्तेषां तुल्यमन्यत्तथोभयोः ३७

पश्वादीनामपि विषयज्ञानं संभवात् गौरविरजो ऽश्वोऽश्वतरो गर्दभो मनुष्यश्चेति सप्त ग्राम्याः पशवः महिषवानरऋक्षद्वीपि
सर्परुरुपृषतमृगा अष्टौ ते सप्तारण्याः पशवः ३६ ननु ज्ञानविशेषस्तु मनुष्यमात्रे संभवतीत्याह ज्ञानं चेति यद्यादृशं मृग
पक्षिणां ज्ञानं तत् तादृशमेव तेषां तद्विधानां मनुष्याणामपि मनुष्याणां यत् तदेव तेषां मृगपक्षिणामपीत्यन्वयः अन्यदाहारा
दिकमप्युभयोः पश्वादिमनुष्ययोस्तुल्यं साधारणमित्यर्थः तथा चाहुः आहारनिद्राभयमैथुनं च सामान्यमेतत्पशुभिर्नराणां
ज्ञानं नराणामधिको विशेषो ज्ञानेन हीनाः पशुभिः समानाः ३७ ॐ नमो भगवत्यै नमः शिवायै नमः शिवाय ६

मनुष्यमात्रस्य पश्वादिसाधारणोऽयं क्रियास्तम्भ इतीत्याह ज्ञानेपीति एतान्ब्रह्मणोऽहरवरान्पतंगान्पक्षिणः शावचंचुषुकणपुत्र
ग्रोटिषु कणमोहादिहतान् व्याहारस्य निक्षेपयत्नान् मोहान्ममत्वलक्षणात् ज्ञानेः कथावुभुक्षयापीड्यमानान पिपश्य वेष
यिकज्ञानमोहयोः सामानाधिकरण्यं साक्षात्कुर्वित्यर्थः खगविहंगविहंगमविहायसाः सकुन्तिपक्षिशकुनिशकुन्तशकु
नद्विजाः पतत्रिपत्रिपतगपतत्पत्ररथाण्डजाइत्यमरः पोतः पाकोऽर्भकोडिंभः पृथुकः शावकः शिशुरित्यमरः चंचुस्त्रोटिः
रोत्स्त्रियामित्यमरः ननु मनुष्याणामपि इयमेवरीतिरित्याह मानुषा इति मनुजव्याघ्रेति भोमनुजश्रेष्ठ व्याघ्रशब्दः श्रेष्ठवचनः

ज्ञानेपि सति पश्यैतान् पतंगान्शावचंचुषु कणमोक्षादृतान्मोहात्पीड्यमानानपि क्षुधा २८ मानुषा मनुजव्याघ्र
साभिलाषाः सुतान्प्रति लोभात्प्रत्युपकाराय नन्वेतान्किं न पश्यसि २९ तथापि ममतावर्त्ते मोहगर्ते निपातिताः॥
महामायाप्रभावेन संसारस्थितिकारिणा ४०

एते मानुषाः सुतान्प्रति साभिलाषाः साकांक्षा इति किं न पश्यसीतिसंबन्धः ननु भो एतेन ज्ञानविशेषणस्य मोहविरोधस्य च मनुष्यविशेषणतिर
रोत्यय प्रत्युपकाराय पोषणाद्युपकारार्थं यो लोभस्तस्मात् सर्वेषां ज्ञानविशेषाप्रवृत्तिरूपत्वमयुक्तमित्याह तथापीति तथा वैषयिके
ज्ञान एवेति भवतो मोह उपपद्यत इति भावः नचैवमपि सर्वेषां ज्ञानविशेषाप्रवृत्तिरूपत्वं अयुक्तमित्याह तथापीति तथा वैषयिके
ज्ञानमोहयोः सामानाधिकरण्यस्य साक्षात्कारेपि सति मोहगर्ते मोहस्यांकारे विषयज्ञाने इति यावत् स्वत्वीयत्वीयज्ञान
ममतावर्त्ते भ्रमः आवर्त्तः तस्मिन् ममता हि विषयज्ञाने पुनः पुनरावर्त्तयति महामायाप्रभावेन कर्त्रा निपातिताः निक्षिप्ता
मानुषा इत्यनुषज्यते तेषां विशेषणं संसारस्थितिकारिणा इति स्वपूर्वदेहेंद्रियविषयवासनासंबन्धः संसारस्तस्य स्थितिः तत्र कर्तृके

मायाप्रभावेनेति वा पाठो ... भ्रमहत्यमरः ४०

उपसंहरति तदिति तत्तस्मादत्र भवतो देवि विस्मयोऽसंभावनानकार्यो न करणीय इत्यर्थः यस्मात्तया महामायया एतज्जगन्मो
ह्यते ननु कासौ महामायेत्याह योगेति महामायानाम हरेरीश्वरस्य योगनिद्रा परमानंदमयी शक्तिः जगत्पतेरिति भगव
तो मोह्यकोटिबहिर्भावसूचकं विशेषणं ४१ ननु केवलं भक्तिमार्गगानसौ मोहयति किंतु ज्ञानिनोपि इत्याह
ज्ञानिनामपीति ज्ञानिनां ज्ञानविशेषवतामपि चेतांसि चित्तं तः करणानि सा प्रसिद्धा महामाया भगवतीत्यर्थः चित्तमू
हि मा देवी द्योतनशीला हि यस्मात् बलात्तव शक्तितः आकृष्य विवेकात्प्याव त्य मोहाय प्रयच्छति मोहानुगामिनि

तत्रात्र विस्मयः कार्यो योगनिद्रा जगत्पतेः महामाया हरेश्चैतत्तया संमोह्यते जगत् ४१ ज्ञानिनामपि चेतांसि
देवी भगवती हि सा बलादाकृष्य मोहाय महामाया प्रयच्छति ४२ तया विसृज्यते विश्वं जगदेतच्चराचरं सैषा
प्रसन्ना वरदा नृणां भवति मुक्तये ४३ सा विद्या परमा मुक्तेर्हेतुभूता सनातनी संसारबंधहेतुश्च सैव सर्वेश्वरे

करोति मोहानुकूलानि करोति भवद्विधानां का कथेति भावः ४२ तयेति तया मूलप्रकृतिरूपया विश्वं जगच्चराचरमि
ति पर्यायैर्विशेषावांतरकार्यजातमभिप्रैति मोहाय प्रयच्छतीत्युक्तं न तन्मोक्षे योनुपपत्तिप्रसंग इत्याह सैषेति सा एवं
धकारणमपि एषा भगवती नित्यप्रसन्ना उपासिता सती नृणां मुक्तये कार्यं उभयविधं सा यदा वरदा भवतीत्यन्वयः ४३ एक
स्यापि बंधमोक्षोभयकारणत्वं समर्थयति सेति विद्या ब्रह्मज्ञानलक्षणा परमा परमपुरुषार्थसाधनत्वात् संसारएव

तत्रां ज्ञाना मीश्वरी पृष्ठतिनिहजिव्यापाता
क ईश्वरीमुच्याहैतज्ञा सर्वस्वतलानुग्रला
टी॰ चं॰ ७ दीनामीश्वरीतिराज्ञः संबोधनेचा ४४

मि४ वा४

पूर्वं रुद्रे योगनिद्रा महामायेति संक्षेपेणोक्ता पुनर्विस्तारार्थं जिज्ञासितं प्रश्नं राजोवाच भगवन्निति भगं सम्यक् ज्ञानं विद्यते यस्मिन् यां
ब्रवीति पूर्वेणान्वयः कर्म चास्याः किं तदन्वयः ४५ यत्स्वभावेत्यत्र स्वभावः स्वरूपमाकारः यदुद्भवा यत्कारणिका ब्रह्म
विदां वर ज्ञानिनां ४६ अनन्तरमृषिरुवाचेति तत्राद्यार्धेन प्रश्नः समाधत्ते नित्यैवेति नित्या प्रागभावध्वंसाभावशून्या द्वितीया
व्याहरति यत्किंचित्तस्याः कर्म जातं प्राप्यते तत्तत्सर्वमस्याः पदेनान्वयः सर्वनाम्नः प्रसिद्धाभिधायित्वात् तुरीयाव्याह

राजोवाच भगवन्का हि सा देवी महामायेति यां भवान् ब्रवीति कथमुत्पन्ना सा कर्मास्याश्च किं द्विज ४५ यत्स्वभावा
च सा देवी यत्स्वरूपा यदुद्भवा तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ४६ ऋषिरुवाच नित्यैव सा जगन्मूर्तिस्त
या सर्वमिदं ततं तथापि तत्समुत्पत्तिर्बहुधा श्रूयतां मम ४७ देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा उत्पन्नेति त
दा लोके सा नित्याप्यभिधीयते ४८ योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते आस्तीर्य शेषमभजत्कल्पान्ते भगवान्प्रभुः
४९ तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ विष्णुकर्णमलोद्भूतौ हन्तुं ब्रह्माणमुद्यतौ ५० स नाभिकमले विष्णोः
स्थितो ब्रह्मा प्रजापतिः दृष्ट्वा तावसुरौ चोग्रौ प्रसुप्तं च जनार्दनं ५१

जगदिति जगदेव मूर्तिराकारो यस्याः सा सर्वत्रैव मदर्थ
दीन् प्रत्याख्यानं गमात् ततो घोषा हन्तव्येति इदं सर्वं तया ततं व्याप्तमिति वा नित्यस्वभावा सा विष्णवर्थः उत्पाद्य स्वरूपागमे नाह तथा
पीति समेत्यव्ययं मतं इत्यन्वयः ४७ ननु नित्यायाः समुत्पत्तिरिति विरुद्धमित्याह देवानामिति आविर्भवति प्रादुर्भवति
अत्रापीति हास्यमवतारयति योगेति योगनिद्रां स्वेच्छया तां निद्रां विष्णुरीश्वरः शेषमनन्ताहिमास्तीर्य तल्पीकृत्य अभजत

श्रीभगवानिति प्रभुरिति ... ४९

ब्रह्माणं विधिं च प्रजानां पतिर्निर्वेता

व४

नुष्टावेति एकाग्रहृदयोऽनन्यनिष्ठांतःकरणः स्थिरः स्थिरेन कृतालयामित्थं नेत्रयोरेव निद्रायाः अभिव्यक्तेस्थानत्वात्तत्र सर्वो
गाधिष्ठात्र्यसौ ५१ कथं तुष्टावेत्याह ब्रह्मोवाच विश्वेश्वरीमिति जगतो धात्रीं जननीं स्थितिर्जन्मसंहारकारिणीं तस्याः
रिणीं विष्णोर्निद्रां तां नौमीति वाचा प्रणमामीत्यन्वयः अतुलमसाधारणं तेजो यस्य क्वचित्तुलोमीत्यादि पद्यद्वयस्था
नेन निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुरिति पठित्वा विष्णो उवाचोत्ते पठंति तत्र अतुष्टावेत्यनेनैवान्वयः अतुला
मनन्यसमां तेजसोऽज्योतिर्रूपस्य विष्णोः प्रभुरिति इत्यस्य विशेषणं तेजसः प्रभुर्ब्रह्मेति वा तेजसः अतुलां पूर्णां
नुष्टाव योगनिद्रां तामेकाग्रहृदयस्थितः प्रबोधनार्थाय हरेर्हरिनेत्रकृतालयां विश्वेश्वरीं जगद्धात्रीं स्थितिसं
हारकारिणीं ५२ निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः ब्रह्मोवाच त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका
णीर्थ्यंकरलोपश्छांदसः नविद्यते तुला यस्याः ॥ सुधा त्वमक्षरे नित्ये त्रिधा मात्रात्मिका स्थिता ५४ ॥ ॥
सा अतुलां तां कस्य तेजसः प्रभुरिति वा ५३ त्वमिति स्वाहा देवहविर्दानमंत्रः स्वधा पितृहविर्दानमंत्रः वषट्क्रियतेऽनेनेति
वषट्कारो यजुः नेतात्मिका नत्वरूपा स्वरा उदात्तानुदात्तस्वरितास्तत्स्वरूपा इति शितात्मा स्वदात्मिका सुधादे
वान्नं हव्यन्वरेरूपत्वं विपरिणामहानेन नित्यत्वं जन्मविनाशहाने एतेन सन्मात्रत्वमाभश्रुति कान्तिस्त्रत इत्वं
रहिते दशाविशेष किंचन नित्यं स्फूर्तिमसत्त्वमात्रास्थिते योजयति त्रिधा त्रिप्रकारा मात्रा ह्रस्वदीर्घप्लुतात्मिका त्र

कार्यकारणकारणत्वात्
इति जाग्रत्स्वप्नसुषुप्त्यभिमानविश्वतैजस
प्राज्ञाभिधया नश्वात्मिकातत्त्वभावात् ५८

या चार्द्धमात्रा नित्या अपरिणामिनी विशेषतो मात्रात्रयवैलक्षण्येनानुच्चार्या वेदान्तवाक्यार्थलक्षणतुर्याभिमानिनी तुरी-
याभिधाया सा त्वमेव एतेन प्रणवरूपत्वमेवेति विवक्षितं तथाह भगवान् त्रियः अकारश्चैवोकारो मकारश्चाक्षरत्रयं
एता एव त्रयो मात्राः सत्त्वराजसतामसाः निर्गुणा योगिगम्यान्या चार्द्धमात्रोर्ध्वसंस्थिता गांधारीति च सा ज्ञेया गांधारस्व-
रसंश्रया पिपीलिकागतिस्पर्शा प्रयुक्ता मूर्ध्नि लक्ष्यते इति तथा मात्राश्चार्द्ध ततः श्रोत्रं विज्ञेया परमार्थतः॥ श्रीरामेणो

अर्द्धमात्रास्थिता नित्या यानुच्चार्या विशेषतः त्वमेव सा त्वं सावित्री त्वं देवी जननी परा ॥५५

॰कानु प्रथममात्रा द्वितीया व्यक्तसंज्ञिता मात्रा तृतीया चिच्छक्तिरर्द्धमात्रा परं पदं क्रमेणानु प्रथमा मात्रा द्वितीया दीर्घसं-
ज्ञिता तृतीया नु प्लुताख्या वाचामगोचरा इति सावित्री गायत्री अत एव देवी विद्योतनशीला परा उत्कृष्टा जननी
त्वं इतरा हि जननी कदाचित् किंचिदेव जनयति त्वं तु अनन्तमपि सर्वं देवजननीति पाठे देवानां माता आदित्वमिति ॥५५

दु॰ टी॰ २

अंते प्रलयसमये ऽत्सि भक्षयसि आत्मसात्करोषि इत्यर्थः अत एव सर्वमेहंत्री ५६ विसृष्टौ सृष्टिकाले पालने स्थिति
काले जगन्मये जगद्रूपिणि वा कुलकत्वादाश्रयः यस्य जगतिमयं ते जायंते सा मयागड् इत्यर्थः अथवा जगतामयो निल
यायस्यां इति अव्ययीभावगड् इत्यर्थः ५७ आद्याविद्या महावाक्यलक्षणाविद्या महती सर्वविषयामाया अन्यत्राप्र

त्वयैतद्धार्यते सर्वं त्वयैतत्सृज्यते जगत् त्वयैतत्पाल्यते देवि त्वमत्स्यंते च सर्वदा ५६ विसृष्टौ सृष्टिरूपा त्वं
स्थितिरूपा च पालने तथा संहृतिरूपांते जगतो ऽस्य जगन्मये ५ महाविद्या महामाया महामेधा महास्मृ
ति महामोहा च भवती महादेवी महासुरी ५८ नमो भगवत्यै चामुंडे नमो भगवत्यै महामायै रामा

त्याकाराभासिनी शक्तिर्महामाया ऽविद्यामूलाविद्येति यावत् महामेधा सकलात्मकावधारणसमाधीः सर्वज्ञशक्तिः
रित्यर्थः स्मृतिर्धर्मशास्त्रं मता महती महास्मृतिर्वेदविद्येति यावत् महामोहो गगनदास्पदत्वात् महासंसारशक्तिः
महादेवी संसारस्वरूपा इंद्रादिलोकपालस्वरूपा महासुरी हिरण्याक्षादिस्वरूपा ५८ श्रीरामाय नमः राम
२

प्रकृतिरिति प्रकृतिर्मूलकारणं गुणत्रयं सत्वरजस्तमोलक्षणं विभावयितुमनुवर्तयितुं शीलं यस्याः कालो मरणं तदुपलक्षिता रात्रिरित्यर्थः कल्पान्तरा त्रिरित्यर्थः महतः ईश्वरस्य रात्रिर्ब्रह्मणो मरणोपलक्षिता रात्रिरिति यावत् मोहोऽकर्तव्ये कर्तव्यग्रहः स एव रात्रिरिव रात्रिः बुद्धिमोषकत्वात् मोहरात्रिर्नि द्राद्यपापाचकरणादुःखपरिहारा ५९ श्रीसम्पत्लक्ष्मीर्वा ह्रीः करुणीये वैमुख्यं कश्चिदाह ह्रीरिति मन्त्रोद्धारं अस्य च साधने अग्रणीत्वे गृहस्थानुनासिक नीकारस्य मप्रत्ययस्याकारलोपेऽनुनासिके सति ह्रीमिति मन्त्राक्षरमिति बुद्धिरंतः करणं बोधलक्षणाध्यवसायव्यापारा लज्जाकृतेऽकरणीये परत्वानत्तानस्यां कथाविषुष्टिरुपचयः तुष्टिरधिगतादन्यत्रालंधीः शान्तिर्विषयज्ञानं क्षान्तिरपकारिण्यनपकारिता ६० चापिनि धनुष्मती बाणाः

प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ५९ त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा लज्जा पुष्टिस्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेव च ६० खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा शङ्खिनी चापिनी बाणभुशुण्डीपरिघायुधा ६१ सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसुन्दरी परापराणां परमा त्वमेव परमेश्वरी ६२ यच्च किंचित्क्वचिद्वस्तु सदसद्वाखिलात्मिके तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा ६३

शरः भुशुंडी गोफणकः परिघो वा परिघो लोहलगुडः न च वक्त्रायुधानि यस्याः सा तथा ६१ सौम्यासौम्यवदनाह्लादहेतुत्वात् अशेषसौम्येभ्यः सकलाह्लादहेतुभ्योऽतिसुन्दरी सौम्यतरनिर्वाणकारणत्वात् पराणां ब्रह्मादीनां परा प्रकृष्टा परमा प्रकृष्टतरा परमेश्वरी शक्रादीनामपीश्वरी ६२ सद्वर्तमानं असद्वर्तीनानागतं शक्तिः स्वभावः सामर्थ्यं वा यद्वा सन्नित्यमाकाशपरमाण्वादि असदनित्यं पृथिव्यादि यत्किंचिद्वस्तुनो मण्यादेस्तस्य सर्वस्य या शक्तिः यथाकाशस्याकाशत्वादि पृथिव्या धारणं वह्नेर्दहनप्रकाशनादि जलस्य शैत्यादि अन्येषां चेतनानां अन्येषां करणी या शक्तिः सा त्वं यदा तदा किं स्तूयसे भेदसाध्यत्वा

चं॰ टी॰
९

जगन्स्रष्टामदाकारेण जगत्पाता विष्णुरूपेण जगदत्ति भक्षयति रुद्रात्मना सप्तनार्ह्णापीश्वरो यथा त्वया निद्रावशं नीतः नाहमीशस्त्वां स्तोतुं कः ई
श्वरः कः समर्थः किं तर्हि न कोपीत्यर्थः ६४ विष्णुः पालनव्यापारः स्रष्टा ब्रह्मा ईशानो रुद्रः एते त्वया यंते त्वया यतः शरीरग्रहणं कारिता इत्यन्वे
यः ६५ साऽनंतरोक्तस्वभावा इत्यमेवंविधैः प्रभावैः महाश्चैः उदारैः साधारणैः ६६ एतौ हन्तुं बोधाऽध्यवसायश्चास्य क्रियतामिति

यथा त्वया जगत्स्रष्टा जगत्पाता तियो जगत् सोपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ६४ विष्णुः शरीरग्रहणमहमीशान
एव च कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान्भवेत् ६५ सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता मोहयैतौ दुराध
र्षावसुरौ मधुकैटभौ ६६ प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु। बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ ६७
ऋषिरुवाच एवं स्तुता तदा देवी तामसी तत्र वेधसा विष्णोः प्रबोधनार्थाय निहन्तुं मधुकैटभौ ६८ नेत्रास्यनासिकाबाहुहृ
दयेभ्यस्तथोरसः निर्गम्य दर्शने तस्थौ ब्रह्मणोऽव्यक्तजन्मनः ६९ उत्तस्थौ च जगन्नाथस्तया मुक्तो जनार्दनः एकार्णवेऽहिश

न्वयः ६७ तामसी निद्राकारपरिणतत्वात् विद्याशक्तिः तदुक्तं व्याल्यीयं तामसी पाक्षिरविद्या पद्मपतोहरेः यया छादितने नोयं पश्यन्नपि न
पश्यति वेधसा ब्रह्मणा ६८ नेत्रास्यादिभ्यो विनिर्गमेति युज्यते प्राणागतेऽपि क्वचिन्न समाहारः समासो भिधानात्क्वचिन्नितरः क्वचिदे
व विकल्पित इति न्यायात् हृदयं त्रान्तः करणं उरो वक्षः हृदयं मम इति वा अन्यत्राहह दयं वक्षः उरः प्रधानां गुह्यामिति ब्रह्मोदर्शनेच

नेइत्यन्वयः कर्मण्यनिद्रा वेत्याम नेपदस्य

राम॰
९

दु
चं·टी
११

मधुकैटभौ दुरात्मानाविति नवाद्दरेणाप्यतृष्टभः पदात् वीर्यमुत्साहः पराक्रमः शत्रूपतिशयः ब्रह्माणमत्तुं प्रसितुं निजघ्नतुः यमौ आरब्धप्रयत्नौ ७१ पंचवर्षसहस्राणि
अत्यंतसंयोगे द्वितीया बाहुवच्चप्रहरणानियुद्धप्रविभुः प्रभुः ७२ वाहद्देऽर्थे· प्रियतां गृह्यतां इत्रीत्यवधारणा ७३ दृतेनवा· ७४ इत्युक्ती तावंचि
ताभ्यां च्छलितामम्भः आपोमयं जलमयं आपोभिर्मार्जनं कुर्वन्ता दाबापः शब्दस्य सङ्काशात् तथाच आप्यं अम्मयं आपोमयमिति गंगाधरकोषः अथवा
आपो जलानि जगत् अमयन् आप्नुवन् इति विलोक्येत्यन्वयः अमयानिति आत्मनेपदस्यानित्यत्वात् परस्मैपदं यथा सर्वं जगत् आपः इति विलो
क्य जघनं चक्रहितं रमणाभवति तथाभगवान् गदितः यथा सर्वं जगदमयं विष्णुमात्रे कशेषं आपो जलानि विलोक्य इत्यन्वयः ७५ श्लाघ्योत्तुष्टः उर्वीपृ

मधुकैटभौ दुरात्मानावतिवीर्यपराक्रमौ क्रोधरक्तेक्षणावत्तुं ब्रह्माणं जनितोद्यमौ ७१ समुत्थाय ततस्ताभ्यां युयुधे भगवान् हरिः पंचवर्षसहस्राणि
बाहुप्रहरणो विभुः ७२ तावप्यतिबलोन्मत्तौ महामायाविमोहितौ उक्तवंतौ वरोऽस्मत्तो व्रियतामिति केशवम् ७३ श्रीभगवानुवाच भवे
तामद्य मे तुष्टौ मम वध्यावुभावपि किमन्येन वरेणात्र एतावद्धि वृतं मया ७४ ऋषिरुवाच वंचिताभ्यामिति तदा सर्वमापोमयं जगत् वि
लोक्य ताभ्यां गदितो भगवान्कमलेक्षणः ७५ आवां जहि न यत्रोर्वी सलिलेन परिप्लुता ७६ ऋषिरुवाच तथेत्युक्त्वा भगवता शंखचक्रगदाभृ
ता कृत्वा चक्रेण वै छिन्ने जघने शिरसी तयोः ७७ एवमेषा समुत्पन्ना ब्रह्मणा संस्तुता स्वयं प्रभावमस्या देव्यास्तु भूयः शृणु वदामि ते ७८ इति

पृथिवी पयः सलिलेन परिप्लुता तत्रावां जहि घातय इत्यन्वयः ७६ तथेत्युक्त्वा भगवता तयोर्वचनमंगीकृत्य जघने पादौ कृत्य हृदयमूले कृत्वा स्थापयित्वा इति
योः शिरसी चक्रेण छिन्ने इत्यन्वयः अत्र छलापदे उर्वीसमाहारः उर्वीत्यतो जघनं स्पृष्टी पृथ्वी अथवा देहस्य पार्थिवत्वात् जघनमपि तत्प्रोच्यते ७७
उपसंहरति एवमिति प्रभावं प्रकृष्टं भवनम् स्वेच्छाकृतजन्मेति यावत् भूयः पुनस्तनुभा ७८ इति श्रीमार्कण्डेयपुराणे प्रथमोऽध्यायः ॥१॥

राम·
११

भूयः स्मृतिवितिस्त्रभिद्दितं तवेति इतिहासमवतारयन् ऋषिरुवाच देवास्त्वसुराश्च प्रहर्तारो यस्मिन् युद्धे तत् देवासुरं अर्शआदिभ्योऽच् इति अर्तोऽ
र्थेऽच् प्रत्ययः देवासुराणामिदमिति अण् वा न वृद्धिः अब्दशतमिति अत्यन्तसंयोगे द्वितीया महिषेऽसुराणामधिपे असुराणां देवद्विषां अधिपे राज्ञि
नि इति काकाक्षिवदन्वयः पुरं हरति पुरंदरः नाम्नि वैवस्वतमन्वन्तरइन्द्रे यावत् तत्र युद्धे इन्द्रः सुरराट् २ पद्मयोनिं ब्रह्माणं प्रजापतिमिति तस्य विशेषणं इति
कृद्गः ३ यथावृत्तं यथाभूतं तद्वत् तथैव महिषासुरस्य चेष्टितं रचितं त्रिदशाः देवाः तयोः शङ्करकृष्णयोः विषये समीपे वा कथयामासुरित्यन्वयः देवानामभि
भवस्य विस्तरः प्रपंचो यत्र चेष्टिते स महिषः सूर्येन्द्राग्न्यनिलेन्दूनां यमस्य वरुणस्य च अन्येषां च अधिकारान् अधितिष्ठति अधिकारेषु तिष्ठति अधिशीङ्स्थासां
ऋषिरुवाच देवासुरमभूद्युद्धं पूर्णमब्दशतं पुरा महिषेऽसुराणामधिपे देवानां च पुरंदरे १ तत्रासुरैर्महावीर्यैर्देवसैन्यं पराजितं जित्वा च सकलान्देवानिन्द्रो
भून्महिषासुरः २ ततः पराजिता देवाः पद्मयोनिं प्रजापतिं पुरस्कृत्य गतास्तत्र यत्रेशगरुडध्वजौ ३ यथावृत्तं तयोस्तद्वन्महिषासुरचेष्टितं त्रिदशाः कथ
यामासुर्देवाभिभवविस्तरं ४ सूर्येन्द्राग्न्यनिलेन्दूनां यमस्य वरुणस्य च अन्येषां चाधिकारान्स स्वयमेवाधितिष्ठति ५ स्वर्गान्निराकृताः सर्वे
तेन देवगणा भुवि विचरंति यथा मर्त्या महिषेण दुरात्मना ६ एतद्वः कथितं सर्वममरारिविचेष्टितं शरणं वः प्रपन्नाः स्मो वधस्तस्य विचिंत्यतां ७
इत्थं निशम्य देवानां वचांसि मधुसूदनः चकार कोपं शम्भुश्च भ्रुकुटीकुटिलाननौ ८ ततोऽतिकोपपूर्णस्य चक्रिणो वदनात्ततः निश्चक्राम महत्तेजो ब्र
कर्मः एषामाधारः कर्म मंत्रस्यात् ५ निराकृताः निःसारिताः भुवि चरंतीत्यन्वयः मर्त्या मनुष्या इव ६ इति गुरुत्वादेकशोषकृद्वचनं प्रपन्नाः आगताः स्मो भवामः
भ्रुकुटी ललाटाकुंचनं तया कुटिले आनने ययोः चक्रिणो विष्णोः ततः सार्वविभक्तिकस्तसि ब्रह्मणः शंकरस्य वदनात् यदि त्वनुवर्तते ९ ततः तेजः ऐक्यं एक
रूपत्वं समगच्छत् इति छांदसात्मनेपदं सं गमपृच्छीत्यादरक मकादपि यत्वात् अथवा ऐक्यं एकत्वार्थं यथा समगच्छत्तथाभवत् १० अतीव उत
कृष्टं कूटं पुंजं अपुरारीनर प्रसिद्धिकात्वात् नात्र आत्मने ११ एकस्थमकाकारेण स्थितं तदितरवत् इमां तत्तेजो नारीकारेण परिणतमभूत् त्विषा दीप्त्या व्या
प्तलोकत्रयं येन १२ प्राभवशावतादित्व्यपंजम्यादृत्वर्थः तस्या मूर्तं तन्मूर्तं वा यात्मनयत्र संबोधिनात्रेत्यसा १२ श्रीरामायनमः नमो भगवत्यै

चं॰ टी॰ १४

सौम्येनेति चांद्रमसेनेति जंघोरू इति शाणां गात्वोदेकवद्भावः दीर्घपादत्वेकवद्भावस्यैवैदिकत्वया समर्थनीयः अन्ये त्वाहु जंघाभ्यां सहितौ ऊरू जंघोरू इति
अपरस्त्वाहु वारुणेन च जंघाश्च अभवन् ऊरू नितंबः भुवः तेजसा अभवत् इदंगुल्यः वसूनामिति तेजसा इत्यनुषज्यते १५ प्राजापत्येन दक्षसंबंधिना प्रजापती
नां दशानां दक्षवशिष्ठरुचिप्रभृतीनां इदं प्राजापत्यं तेन प्राजापत्येन प्रजापतीनां दर्शनाच्च तेजसा इति वामनपुराणादर्शनात् यत्तेजः जातं १६ सन्ध्ययोः

अन्येषां चैव देवानां शक्रादीनां शरीरतः निर्गतं सुमहत्तेजस्तच्चैक्यं समगच्छत १० अतीव तेजसः कूटं ज्वलन्तमिव पर्वतं ददृशुस्ते सुरास्तत्र
ज्वालाव्याप्तदिगन्तरम् ११ अतुलं तत्र तत्तेजः सर्वदेवशरीरजं एकस्थं तदभून्नारी व्याप्तलोकत्रयं त्विषा १२ यदभूच्छांभवं तेजस्तेना-
जायत तन्मुखं याम्येन चाभवन्केशा बाहवो विष्णुतेजसा १३ सौम्येन स्तनयोर्युग्मं मध्यं चैन्द्रेण चाभवत् वारुणेन च जंघोरू नितंब-
स्तेजसा भुवः १४ ब्रह्मणस्तेजसा पादौ तदंगुल्योऽर्कतेजसा वसूनां च करांगुल्यः कौबेरेण च नासिका १५ तस्यास्तु दन्ताः संभूताः
प्राजापत्येन तेजसा नयनत्रितयं जज्ञे तथा पावकतेजसा १६ भ्रुवौ च सन्ध्ययोस्तेजः श्रवणावनिलस्य च अन्येषां चैव देवानां
संभवस्तेजसां शिवा १७ ततः समस्तदेवानां तेजोराशिसमुद्भवां तां विलोक्य मुदं प्रापुरमरा महिषार्दिताः १८ शूलं शूलाद्वि
निः कृष्य ददौ तस्यै पिनाकधृक् चक्रं च दत्तवान्कृष्णः समुत्पाद्य स्वचक्रतः १९

पूर्वापरयोः तेजः भ्रुवौ करणस्य कर्तृत्वं
साध्यसिः छिनत्तिवत् श्रवणौ कर्णौ संभवतीति संभवः कार्यं अन्येषां वायुनासत्यविश्वकर्मप्रभृतीनां देवानां तेजसां शिवा
संभव इत्यन्वयः अनाविष्टलिंगत्वात्पुंस्त्वं १७ मुदं चित्तोल्लासं १८ विनिः कृष्य उत्पाद्येति यवत् पिनाकं धत्तेति धृक् शि
पिनाकधृक् महादेवः स्वचक्रतः सुदर्शनात्समुत्पाद्य जनयित्वा समुत्पाद्येति वा पाठः एवमुत्तरत्रापि ॥१९॥ ॥ १४

वरुणः शंखं दत्तवान् इत्यनुषज्यते चापं धनुः बाणपूर्णो अक्षयबाणौ इषुधी तूणौ तूणोपासंगतूणीरनिषंगा इषुधिर्द्वयोरित्यमरः २०
२१ कालदंडसमुत्था ऽत्रेत्यनुषज्यते अंबुपतिर्वरुणः ब्रह्मा अक्षमालां कमंडलुं च ददावित्यन्वयः प्रजापतिरिति ब्रह्मणो विशेषणं ब्रह्मा
क्षमालां कमंडलुं चेति यावत् अनयोः प्राग्वर्णनात् रोमकूपेषु रोमच्छिद्रेषु कालो निमेषाद्यभिमानिनी देवता तस्या दूतिमता पश्चाद्दानत्वात् संपदा
नत्वे यद्वा संबंधविवक्षया षष्ठी अन्यत्स्पष्टं खड्गं दत्तवान् तस्य खड्गस्य चर्म दत्तवान् चर्म किंभूतं अः प्रदीप्तं असदीप्ताविव्यस्य धातोः कि

शंखं च वरुणः शक्तिं ददौ तस्यै हुताशनः मारुतो दत्तवान् चापं बाणपूर्णौ तथेषुधी २० वज्रमिंद्रः समुत्पाद्य कुलिशादमराधिपः
ददौ तस्यै सहस्राक्षो घंटामैरावताद्गजात् २१ कालदंडाद्यमो दंडं पाशं चांबुपतिर्ददौ प्रजापतिश्चाक्षमालां ददौ ब्रह्मा कमंडलुं
समस्तरोमकूपेषु निजरश्मीन्दिवाकरः कालश्च दत्तवान् खड्गं तस्य चर्म च निर्मलं २३ क्षीरोदश्चामलं हारमजरे च तथांबरे
चूडामणिं तथा दिव्यं कुंडले कटकानि च २४ अर्धचंद्रं तथा शुभ्रं केयूरान्सर्वबाहुषु नूपुरौ विमलौ तद्वद्ग्रैवेयकमनुत्तमं २५ अंगुली
यकरत्नानि समस्तास्वंगुलीषु च विश्वकर्मा ददौ तस्यै परशुं चातिनिर्मलं अस्त्राण्यनेकरूपाणि तथाऽभेद्यं च दंशनं अम्लानपंकजां
(मालां शिरस्युरसि चापरां २७ रामत्री

पिस्तं चर्मफलकं अथवा चर्मवत् कुलं छं दस्ति इनि तृतीयेन छंदसि बहुधा पृष्ठ वक्र
लसयात् तस्येत्यर्थे तस्याः इत्यर्थः अजरे अविनश्वरे नित्यनूतने अंबरे वाससी कटकानि वलयानि २४ केयूरान् अंगदानि अंगदं तु केयू
रे केयूरं पुंनपुंसकमित्यभिधानात् नूपुरौ हंसकौ ग्रैवेयकं ग्रीवाभरणं अनुत्तमं नास्त्युत्तमं यस्मात् २५ अंगुलीयकरत्नानि
गुलीयकभूषणानि २६ अनेकरूपाणि बहुरूपाणि अभेद्यं भेत्तुमशक्यं दंशनं कवचं चूडामणादिकं विश्वकर्मा ददौ विना

अददत् दत्ते रात्मनेपदिनोपि छांदसत्वात् परस्मैपदं एवं युक्तधुविज्जिनचोत्यत्संपत्तिचापरइतिनिरीक्षिष्यामि यत्सुनीनिति यथा परस्मैपदे त्वात्म
नेपदं यथा भवेथा सर्वदा विकल्पति वध्या चान्यानकर्षनवा खड्गेनानिरहंतत प्राप्स्यसेमत्परिग्रहान् स्वराज्यं प्राप्स्यतेभवानिति २८ सुरया
अमेनेनअशून्यं पूरितं मणिभ्यो महान्मणिरीत्तरलइत्यर्थः २९ नागहारं नागलोकोद्भवं इमां धत्ते धारयति ३० साट्टहासं यथा स्यात्
तथा कृत्स्नमशेषं नभो व्योम भुवर्लोक इत्यर्थः आपूरितमभिव्याप्तं ३१ मीयते ऽनेनेति मा परिमाणं तेन यथा ति नगच्छति अमाय

अददज्जलधिस्तस्यै पंकजं चातिशोभनं हिमवान्वाहनं सिंहं रत्नानि विविधानि च २८ ददावशून्यं सुरया पानपात्रं धना
धिपः शेषश्च सर्वनागेशो महामणिविभूषितं २९ नागहारं ददौ तस्यै धत्ते यः पृथिवीमिमां अन्यैरपि सुरैर्देवी भूषणै
रायुधैस्तथा ३० संमानिता ननादोच्चैः साट्टहासं मुहुर्मुहुः तस्या नादेन घोरेण कृत्स्नमापूरितं नभः ३१ अमाया
तातिमहता प्रतिशब्दो महानभूत् चुक्षुभुः सकला लोकाः समुद्राश्च चकंपिरे ३२ चचाल वसुधा चेलुः सकलाश्च
महीधराः जयेति देवाश्च मुदा तामूचुः सिंहवाहिनीं ३३ तुष्टुवुर्मुनयश्चैनां भक्तिनम्रात्ममूर्तयः दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यं

न ते न च अमायता अपरिमितेनेत्यर्थः यद्वा अमा रविरश्मिविशेषस्तां यता गच्छता स्पृशतेति यावत् अमा नाम रवे रश्मिः सूर्यलोके प्र
तिष्ठते निस्मरणात् यद्वा अमायता सह गच्छता अपादहाट्टहसितेन अमा सह समीपे वेत्यभिधानात् मानः मायः यस्य न विद्यते मायो
यस्य सो ऽमायः न हृदि यत्नाचरितीत्यनपिलापस्ततशात्रिजेतानन्नीयेत्यन्नो यद्वा अमायस्वभावः अमायता अमितनंतया ऽतिमहता
त्यन्वयः अतिमहतेति हेतुगर्भविशेषणं प्रतिशब्दो मुख्यशब्दध्वन्यन्तरं चकंपुः चालिताः ३२ महीधराः पर्वताः अर्थाहत्वेन

सन्नद्धाखिलसज्जितानि अखिलसैन्यानि येषां ते समुत्तस्थुः उद्योगं चक्रुः उदायुधाः उद्यतास्त्राः आः इत्ययं क्रोधाविष्कारस्यानुकारः ३५ अभ्यधावत् शब्दलक्ष्याभिमुखं जगाम ३६ किरीटेनोल्लिखितमम्बरं व्योम यया धनुर्ज्यानिःस्वनेन क्षोभितान्यशेषपातालानि यया ३७ समन्तात् सर्वतः ३८ शस्त्रैरस्त्रैः खड्गादिभिः अस्त्रैः क्षेप्यैः शरादिभिः शस्त्रास्त्रैर्वा शस्त्रमायुधलोहयोरित्यमरः बहुधा बहुप्रकारैः चिक्षुराख्

सन्नद्धाखिलसैन्यास्ते समुत्तस्थुरुदायुधाः आः किमेतदिति क्रोधादाभाष्य महिषासुरः ३५ अभ्यधावत तं शब्दमशेषैरसुरैर्वृतः स ददर्श ततो देवीं व्याप्तलोकत्रयां त्विषा ३६ पादाक्रान्त्या नतभुवं किरीटोल्लिखिताम्बरां क्षोभिताशेषपातालां धनुर्ज्यानिःस्वनेन तां ३७ दिशो भुजसहस्रेण समन्ताद्व्याप्य संस्थितां ततः प्रववृते युद्धं तया देव्या सुरद्विषां ३८ शस्त्रास्त्रैर्बहुधा मुक्तैरादीपितदिगन्तरं महिषासुरसेनानीश्चिक्षुराख्यो महासुरः ३९ युयुधे चामरश्चान्यैश्चतुरङ्गबलान्वितैः रथानामयुतैः षड्भिरुदग्राख्यो महासुरः ४० अयुध्यतायुतानां च सहस्रेण महाहनुः पञ्चाशद्भिश्च नियुतैरसिलोमा महासुरः ४१ अयुतानां शतैः षड्भिर्बाष्कलो युयुधे रणे गजवाजिसहस्रौघैरनेकैः परिवारितः ४२॥

चिक्षुर्नाम चामरश्चान्यैः असुरान्तरैः सहितः चत्वारि रथा नागा हयाः पदातयश्चाङ्गानि यस्य तेन बलेनान्वितः उदग्रनामा ४० अयुतानां सहस्रेण कोट्या इत्यर्थः एकं दश शतं चैव सहस्रमयुतं तथा लक्षं च नियुतं चैव कोटिरर्बुदमेव च वृन्दं खर्वो निखर्वश्च शङ्खपद्मौ च सागरः अन्त्यं मध्यं परार्धं च दश वृद्ध्या यथाक्रमं ब्रह्माण्डपुराणदर्शनात् पञ्चाशद्भिर्नियुतैः पञ्चकोटिभिः ४१ अयुतानां षड्भिः शतैः षष्टिलक्षैः रथानामित्यनुवर्तते

ॐ
चं॰टी॰
२९

रथानांचकोट्याहृत: परिवारित: परिवारितत्त्वामायुध्यतेत्यन्वय: विडालस्याक्षिणीवाक्षिणीयस्यसविडालाक्ष: विडालइत्याख्यायस्येतिको
चित्तनक्षो दुर्द्धरोदुर्मुखश्चैवविडालनयनोपर: इतिवामनपुराणवचनात् अथेत्यानंतर्ये ४३ रथानामयुतानांपंचाषड्भिरयुतै: पंचाश
त्कोटिभिरित्यर्थ: परिवारितोवेष्टित: समरेरत: अन्येचचंडमुंडरक्तबीजादय: अयुतशोऽयुतसंख्याका: ४४ कोटिकोटिसहस्रै: पर
द्भैनेतिप्रवत् दंतिनांरथानांचकोटिकोटिसहस्रैरित्यन्वय: ४५ मुशलैर्योद्धुश्च ४६ परशुभि: कुठारिकाभि: पट्टिशै: खड्गविशेषै:

वृतोरथानांकोट्याचयुद्धेतस्मिन्नयुध्यत विडालाख्योयुतानांचपंचाषड्भि: रथायुतै: ४३ युयुधेसंयुगेतत्ररथानांपरिवारित:
अन्येचतत्रायुतशोरथनागहयैर्वृता: ४४ युयुधु: संयुगेदेव्यासहतत्रमहासुरा: कोटिकोटिसहस्रैस्तुरथानांदंतिनांतथा
हयानांचवृतोयुद्धेतत्राभून्महिषासुर: तोमरैर्भिंडिपालैश्चशक्तिभिर्मुशलैस्तथा ४६ युयुधु: संयुगेदेव्याखड्गै: परशुपट्टि
शै: केचिच्चचिक्षिपु: शक्ती: केचित्पाशांस्तथापरे ४७ देवींखड्गप्रहारैस्तुतेतांहंतुंप्रचक्रमु: सापिदेवीततस्तानिशस्त्राण्यस्त्राणि
चंडिका ४८ लीलयैवप्रचिच्छेदनिजशस्त्रास्त्रवर्षिणी अनायस्ताननादेवीस्तूयमानासुरर्षिभि: ४९ मुमोचासुरदेहेषुशस्त्राण्य
स्त्राणिचेश्वरी सोपिक्रुद्धोधुतसटोदेव्यावाहनकेशरी ५० चचारासुरसैन्येषुवनेष्विवहुताशन: निश्वासान्मुमुचेयांश्चयुध्यमा

मुशलपट्टिशौमध्यात्तौ तालव्यमूर्धन्यावपिमहापट्टिशंमल्लवरंवाराणगुरुपुरुमुशलमितिपट्टिस्मरणात् वंशकवंशिकमुशलमिति
पट्टिशपाशाशापाशाययइतिचाप्यभेदात् ४७ प्रचक्रमु: प्रक्रांता: ४८ अनायस्ताननादेवीत्यविक्लमसुखी सक्रोधमुखी चायस्तेभेजिते
क्षिप्तेक्लिशितेकुपितेहतेइत्यभिधानात् ४९ धुतसट: कंपितकेसर: दंतिमध्यस्तालव्यमध्यश्चकेशकेसर: केशरोपीति द्विरूपात्केशरी

राम
२९

तएवनिश्वासादेवगणा: संभूता इत्यन्वय: महासुरनस्त्रगान तेषगणा: ५२ देव्या: शक्त्याप्रभावेन उपबृंहिता: आप्यायिता: अवादयंत वादितवंत: अवाद यंत इति क्वचित्पाठ: तत्र युयुधुरिति पूर्वेण संबंध: ५३ युद्धमेव महोत्सवो वीराणां हर्षावहत्वात् शक्तीनां वृष्टिभिर्वर्षणै: ५४ ५५ अक र्षयत आकृष्टवती कृषेश्चाद्यादिकात्कर्तृरि अकर्षत इति पाठ: ५६ गदया विपोथिता अभिमर्दिता: संतो निपातेन निपतनेन भुवि शेर

तएवसद्य: संभूतागणा: शतसहस्रश: युयुधुस्तेपरशुभिर्भिंडिपालासिपट्टिशै: ५२ नाशयंतोसुरगणान्देवीशक्त्युपबृंहिता: अवादयंत: पटहान्गणा: शंखांस्तथापरे ५३ मृदंगांश्चतथैवान्येतस्मिन्युद्धमहोत्सवे ततोदेवीत्रिशूलेनगदयाशक्तिवृष्टिभि: ५४ खड्गादिभिश्चशतशोनिजघानमहासुरान् पातयामासचैवान्यान्घंटास्वनविमोहितान् ५५ असुरान्भुविपाशेन बध्वाचान्यानकर्षत केचिद्द्विधाकृतास्तीक्ष्णै: खड्गपातैस्तथापरे ५६ विपोथितानिपातेनगदयाभुविशेरते । वेमुश्चके ।चिद्रुधिरंमुशलेनभृशंहता: ५७ केचिन्निपतिताभूमौभिन्ना: शूलेनवक्षसि निरंतरा: शरौघेण कृता: केचिद्रणाजिरे ५८

त इत्यन्वय: अथवा मदयायोनिपातोनिपतनं यद्वा गदयेति षष्ठ्यर्थे तृतीया गदयानिपातेनेत्यन्वय: वेमुरुज्झितवन्त: बाधित्तेपिसर्वे विधय: छंदसि विकल्पंत इति नजानिर्दिष्टस्यानित्यत्वाद्वा न शसददादि इत्यादिना एत्वमभ्यासलोपश्च न भवति यद्वा वमिरो धातुर्वकारोऽन्त्योऽस्ति तस्येदं रूपं सूत्रे निर्दिष्टोदंत्य इति उद्धमुसलत्र रुधिरं वलिनोऽप्यनिराकृता इत्यत्रापि भृशं दृढं हता: ताडिता:

ॐ
चं॰टी॰ २५

श्येनानांपक्षिणांमनुकारिणः सदृशाः यथाश्येनाः स्वपत्रैर्निरंतरगात्रस्थादेवान्यापिशरैरित्यन्वयः यद्वा श्येनानुकारिणः श्येनपत्रि
रोणाल्यैवस्वजयकोशः शरेघपूर्णत्वात् शल्यमृगाइवलक्ष्यंते श्येनानुकारिणइति पाठे श्येनामनुकर्तुंशीलंयेषांते सेनाश्वसादय
र्थः सेनानियंतारइतिकेचित् ५९ मध्येहृदि ऊर्व्यांभूमौ ६० पुनरुत्थिताइति मनुष्याणांसहस्रेषुहतेषुपतितेषु उत्तिष्ठत्येकः कबंधोपि
वक्तुमुत्थायचापतन्निति तूर्यलयान्वितावाद्यानुसारिणः ६२ कवंधाश्छिन्नशिरसइतिपर्यायाभ्यांतिसांन्द्रत्ति रक्तत्वमाह छिन्न

श्येनानानुकारिणः प्राणान्मुमुचुस्त्रिदशार्दनाः केषांचिद्बाहवश्छिन्नाः छिन्नग्रीवास्तथापरे ५९ शिरांसिपेतुरन्येषामन्येम
ध्येविदारिताः विच्छिन्नजंघास्त्वपरे पेतुरुर्व्यांमहासुराः ६० एकबाह्वक्षिचरणाः केचिद्देव्याद्विधाकृताः छिन्नेपिचान्येशिरसिप
तिताः पुनरुत्थिताः ६१ कबंधायुयुधुर्देव्यागृहीतपरमायुधाः ननृतुश्चापरेतत्रयुद्धेतूर्यलयाश्रिताः ६२ कबंधाश्छिन्न
शिरसः खड्गशक्त्यृष्टिपाणयः तिष्ठतिष्ठेतिभाषंतोदेवीमन्येमहासुराः ६३

शिरसइति स्वरूपाख्यानमात्रंवा कोवायुरेवबंधः
स्वाश्रयोयेषांतेकबंधइतिवा यद्वा छिन्नेशिरसोपिकबंधाः कंशिरोबध्नंतीतिकबंधाः तेषांमायाविदत्वात् छिन्नमपिशिरोबद्ध्वाभ्रमंति
तदावक्तुमपितमायधिष्ठानत्वात् यद्वा छिन्नेशिरसियेकबंधाश्चापिस्वन्येषांपरः छिंदंति कवंधोऽस्त्रीक्रियायुक्तमपमूर्द्धकलेवरं
इत्यमरः पूर्वंछिन्नशिरसः पश्चात्कबंधाः क्रियायुक्ताः तूर्यतालाश्रिताइतियावत् तिष्ठतिष्ठेतिभाषंतः मात्वेपादपिभाषमाणा
इवेतिइवार्थोपमः अन्यथाछिन्नशिरस्त्वात् कथंतिष्ठतिष्ठेतिवदिष्यंति कश्चिदाह कबंधास्सरजातिविशेषास्तान्दिव्यौषधाच्छि
न्नशिरसइति अहंकबंधजात्यसरव्यवच्छेदकोछिन्नशिरसइतिविशेषणं ऋष्टयः एकधाराः खड्गाः अन्येकबंधेतरेयुयुधुः ननृतुः

२५

६४ वारणासुरवाजिनां शोणितमेघौघो जलप्रवाहो यासु ता: महानद्य: तत्र असुरस्य सैन्यस्य मध्ये सद्य: विसुस्रुवु: ६५ महासैन्यं सेनासमुदायं निन्ये नीतवती ६६
अमून् विचिन्वति आदाय समुच्चिनोति इवेत्युत्प्रेक्षायां विचिन्वतीति विपूर्वत्वात् चिनोते: क्रियासमभिहारत्वात् लोट्यपि पंचमो मध्यमपुरुषैकवचनम् अ
तिविचिन्वतीति वक्तव्ये विचिन्वतीत्युक्ते अकारवर्णागमत्रार्थिकारेण वाकुत्वेन वा छंदोऽनुरोधात् यद्वाम्बिका महासैन्यं क्षयं निन्ये सिंहस्य तस्मिन्नसं

पातितै रथनागाश्वैरसुरैश्च वसुंधरा अगम्या साऽभवत्तत्र यत्राऽभूत्स महारणः ६४ शोणितौघा महानद्य: सद्यस्तत्र विसुस्रुवु: मध्ये चासुरसैन्य
स्य वारणासुरवाजिनां क्षणेन तन्महासैन्यमसुराणां तथाम्बिका निन्ये क्षयं यथा वह्निस्तृणदारुमहाचयं ६६ स च सिंहो महानादमु
त्सृजन्धुतकेसरः शरीरेभ्योऽमरारीणामसूनिव विचिन्वति ६७ देव्या गणैश्च तैस्तत्र कृतं युद्धं तथासुरैः यथैषां तुतुषुर्देवाः पुष्पवृष्टि
मुचो दिवि ६८ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये महिषासुरसैन्यवधो नाम द्वितीयोऽध्यायः २ ऋषिरुवाच॥

हे असुराणां शरीरेभ्य: असून् प्राणान् राशीनिव कुर्वन्निस्तति ६७ देव्याम्बिकाया: गणै: तत्र असुरै: सार्द्धं युद्धं तथा कृतं यथा दिवि देवा एषां
गणानां तुष्टुवुस्तुष्टा इत्यन्वयः ६८॥ ॥इति श्रीचतुर्भुजमिश्रकृतायां चंडिमाहात्म्यटीकायां महिषासुरसैन्यवधः द्वितीयोऽध्यायः २

यथा मेरुगिरेः शृंगमिति अद्भुतोपमा २।१२ सशोल्कसन्शरसमूहान् यंतारं सारथिं ३ आशुगैर्बाणैः ४ सव्ये वामे ६ तस्या भुजमित्यन्वयः पफाल
अभज्यत तेन वर्षीः त्रिफलादि सरणोऽन्यस्माद्रूपं हे नृपनंदन तस्या भुजं प्राप्य खड्गेन पफाल इत्यन्यक्रियानिष्पत्तिं नाकरोत् एवं च फल
निष्पन्नादित्यस्मादेव रूपं तच्छूलं तमिति वा पाठः अस्त्रीशूलं रुगायुधं तमिति द्विलिंगत्वाभिधानात् तेजोभिः रश्मिभिः ज्वा

ऋषिरुवाच निहन्यमानं तत्सैन्यमवलोक्य महासुरः सेनानीश्चिक्षुरः कोपाद्ययौ योद्धुमथांबिकां १ स देवीं शरवर्षे
णववर्ष समरेऽसुरः यथा मेरुगिरेः शृंगं तोयवर्षेण तोयदः २ तस्य छित्वा ततो देवी लीलयैव शरोत्करान् जघान तुर
गान्बाणैर्यंतारं चैव वाजिनां ३ चिच्छेद च धनुः सद्यो ध्वजं चातिसमुच्छ्रितं विव्याध चैव गात्रेषु छिन्नधन्वानमाशुगैः ४
सच्छिन्नधन्वा विरथो हताश्वो हतसारथिः अभ्यधावत तां देवीं खड्गचर्मधरोऽसुरः ५ सिंहमाहत्य खड्गेन तीक्ष्णधा
रेण मूर्द्धनि आजघान भुजे सव्ये देवीमप्यतिवेगवान् ६ तस्याः खड्गो भुजं प्राप्य पफाल नृपनंदन ततो जग्राह शूलं स को
पादरुणलोचनः ७ चिक्षेप च ततस्तत्तु भद्रकाल्यां महासुरः जाज्वल्यमानं तेजोभी रविबिंबमिवांबरात् ॥ ८ ॥

ज्वल्यमानं तीव्रं ज्वलन् तेजोभिः रविबिंबमिव इति अंबरादाकाशात् सुपां सुलो भवंतीति सप्तम्यर्थे पंचमी यद्वा आसनात् प्रेक्षते आसने स्थि
त्वा प्रेक्षते इत्यर्थः यद्वा अंबरे सप्रवस्यापर बिंबमिवेति ल्यब्लोपे पंचमी केचित्तु अंबरं अनुतनीति अंबरात् अनुसानुलोम
तेजोऽपि रविबिंबस्येव विशिष्टएतमाह्नः तोरलोपे मितिदीर्घत्वं कु स्वपाठः विशदपदं रविवचनं अविमेघो गिरौ सूर्ये आभि

दे॰ टी॰
१०

नदेवस्यामरेमूलं तेनदेव्याः शूलेनशतधानीतं चूर्णीकृतंमहासुरश्छिद्रः शतधानीतइत्यर्थः ॥९॥१०॥११॥१२॥ समुत्पत्यम्शालु
त्या॥१३॥ गजमस्तकं शक्तिसमस्त्यौ क्रोधातिशयशालिनौ १४ वेगात्गतिनातस्मात्कुमाकाश मृगारिणासिंहेनप्रथक्कृतंछिन्नं १५ रणे
युद्धे दंतैर्वहस्तिदंतेननिर्मितोयोमुष्टिः खड्गमुष्टिः तस्यतलेरधोभागघातैः यद्वा दंतैर्मुष्टिभिस्तलैः करतलेश्चभुजैसहस्रवात्

हत्वातदपतच्छूलंदेवीशूलममुंचत्त तच्छूलंशतधातेननीतंसचमहासुरः ९ हतेतस्मिन्महावीर्येमहिषस्यचमूपतौ
आजगामगजारूढश्चामरस्त्रिदशार्दनः १० सोपिशक्तिमुमोचाथदेव्यास्तामंबिकाद्रुतं हुंकाराभिहतांभूमौपातयामासनि
ष्प्रभां भग्नांशक्तिंनिपतितांदृष्ट्वाक्रोधसमन्वितः चिक्षेपचामरःशूलंबाणैस्तदपिसाछिनत् १२ ततःसिंहःसमुत्पत्य
गजकुंभांतरेस्थितः बाहुयुद्धेनयुयुधेतेनोच्चैस्त्रिदशारिणा १३ युध्यमानौततस्तौतुतस्मान्नागान्महींगतौ युयुधातेतिसं
रब्धौप्रहारैरतिदारुणैः १४ ततोवेगात्खमुत्पत्यनिपत्यचमृगारिणा करप्रहारेणशिरश्चामरस्यपृथक्कृतं ॥१५
उदग्रश्चरणेदेव्याशिलावृक्षादिभिर्हतः दंतमुष्टितलैश्चैवकरालश्चनिपातितः १६ देवीक्रुद्धागदापातैश्चूर्णयामास
चोद्धतं बाष्कलंभिंडिपालेनबाणैस्ताम्रंतथांधकं १७ उग्रास्यमुग्रवीर्यंचतथैवचमहाहनुं त्रिनेत्राचत्रिशूलेनजघानप
रमेश्वरी १८ बिडालस्यासिनाकायात्पातयामासवैशिरः दुर्धरंदुर्मुखंचोभौशरैर्निन्येयमक्षयं १९ एवंसंक्षीयमाणे
तुस्वसैन्येमहिषासुरः माहिषेणस्वरूपेणत्रासयामासतान्गणान् कांश्चित्तुंडप्रहारेणखुरक्षेपैस्तथापरान् लांगूलताडि

वक्त्रवचनं १६ उद्धतंउद्धतेउद्धतनामानं १७॥१८ बिडालाक्षस्येतिवक्तव्ये बिडालस्येति संज्ञैकदेशोसंज्ञाग्रहणीति इतिन्यायात् यथा
भीमोभीमसेनः तथाबिडालस्यबिडालाक्षस्ययमक्षयंयमगृहं १९ ताननिश्वासभयात् २ खुरक्षेपः पादाघातैः कवर्गीयतृतीयादि

[illegible] स्वशब्दः [illegible] कवर्गीयइत्यभिधानात् २१

ग

१२

वेगेन गतितारतम्येन भ्रमणेन मंडलाकारगत्या २२ पेर्मुः गताः तेषामनीकं सैन्यं २३ तस्य वेगभ्रमणाभ्यां विदलिता विदीर्णेत्यर्थः २५ मही
यसी अत्यये विशीर्णा कर्मकर्तरि यात्मनेपदम् खंडखंडमिति क्रियाविशेषणम् ययुरूपगताः घनाः मेघाः श्वासानिलास्ताः निश्वासवेगादि
त्ताः नभसः आकाशात् अप्रसेपणे २६ क्रोधसमाध्मातः क्रोधेनोद्धतः २७ तसेति संवेधकरणासक्तौ मृधे युद्धे २८ ॥२०॥ आशु शीघ्रं आसवे
वेगेन कांश्चिद्रूपवानादेन भ्रमणेन च निःश्वासपवनेनान्यानन्यान् पातयामास भूतले २२ निपात्य प्रमथानीकमभ्यधावत सोऽसुरः सिंहं हंतु
महादेव्याः कोपं चक्रे ततोऽम्बिका २३ सापि कोपान्महावीर्यः खुरक्षुण्णमहीतलः शृंगाभ्यां पर्वतानुच्चांश्चिक्षेप च ननाद च २४ वेगभ्रम
विक्षुण्णा मही तस्य व्यशीर्यत लांगूलेनाहतश्चाब्धिः प्लावयामास सर्वतः २५ धुतशृंगविभिन्नाश्च खंडखंडं ययुर्घनाः श्वासानिला
स्ताः शतशो निपेतुर्नभसोऽचलाः २६ इति क्रोधसमाध्मातमापतंतं महासुरं दृष्ट्वा सा चंडिका कोपं तद्वधाय तदाकरोत् २७
साक्षिप्त्वा तस्य वै पाशं तं बबंध महासुरं तत्याज माहिषं रूपं सोऽपि बद्धो महामृधे २८ ततः सिंहोऽभवत्सद्यो यावत्तस्याम्बिका शिरः छि
नत्ति तावत्पुरुषः खड्गपाणिरदृश्यत २९ तत एवाशु पुरुषं देवी चिच्छेद सायकैः तं खड्गचर्मणा सार्धं ततः सोऽभून्महागजः ३० क
रेण च महासिंहं तं चकर्ष जगर्ज च कर्षतस्तु करं देवी खड्गेन निरकृंतत ३१ ततो महासुरो भूयो माहिषं वपुरास्थितः तथैव क्षोभयामास
त्रैलोक्यं सचराचरं ततः क्रुद्धा जगन्माता चंडिका पानमुत्तमं पपौ पुनः पुनश्चैव जहासारुणलोचना ३३ ननर्द चासुरः सो
ऽपि बलवीर्यमदोद्धतः विषाणाभ्यां च चिक्षेप चंडिकां प्रति भूधरान् ३४ सा च तान्प्रहितांस्तेन चूर्णयंती शरोत्करैः उवाच तं मदोद्धतमुख
वांगुरूपं चिच्छेदेत्यन्वयः सायकैर्बाणैः खड्गचर्मणा च सहितं पुरुषं खड्गं चर्म च चिच्छेदेत्यन्वयः ३० ३१ वपुः शरीरं आस्थितः गृहीतवान् त
थैव पूर्ववत् ३२ पीयत इति पानं मधु ३३ बलं शारीरं सामर्थ्यं उत्साहः ताभ्यां यो मदो गर्वः तेन उद्धतः उद्रिक्तः ३४ मदेन उद्धूतो मुखरागरागो य

वीर्य

गर्ज्जगर्ज्जेति संभ्रमेणउन्मत्तकिः आशुशीघ्रं ३६ पादेनाक्रम्यपृष्ठं इति शेषः ३७ ततः तस्मात् निजमुखात् स्वात्ममुखात् ततः शूलताडना
द्धेतोः अर्द्धनिःक्रांतो निःसृतार्द्धकायः तयादेव्यावीर्येणसामर्थ्येनअतिशयेनसंवृतः प्रतिबद्धइत्यन्वयः ३८ एवंचशिरश्छेदोऽपिव

देव्युवाच गर्ज्जगर्ज्जक्षणंमूढमधुयावत्पिबाम्यहं मयात्वयिहतेत्रैवगर्ज्जिष्यंत्याशुदेवताः ३७ ऋषिरुवाच एवमुक्त्वासमु
त्पत्यसारूढातंमहासुरं पादेनाक्रम्यकंठेचशूलेनैनमताडयत् ३७ ततः सोपिपदाक्रांतस्तयानिजमुखात्ततः अर्द्धनि
ष्क्रांतएवासीद्देव्यावीर्येणसंवृतः ३८ अर्द्धनिष्क्रांतएवासौयुध्यमानोमहासुरः तयामहासिनादेव्याशिरश्छित्वानि
पातितः ३९ ततोहाहाकृतंसर्वंदैत्यसैन्यंननाशतत् प्रहर्षंचपरंजग्मुःसकलादेवतागणाः ४० तुष्टुवुस्तांसुरादे
वींसहदिव्यैर्महर्षिभिः जगुर्गंधर्वपतयोननृतुश्चाप्सरोगणाः ४१ इतिश्रीमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमा
हात्म्येमहिषासुरवधः तृतीयोध्यायः ३

तद्ववद्वानवं खड्गपातेन मित्यादिविशेषतः कल्पांतरे ग्राह्य इति प्रतीयते ३९ कृतं हाहाशब्दं सर्वमित्यवशिष्टाभिप्रायेण ननाश अपलायि
त प्रहर्षं हर्षोद्रेकं परमतिशयं जग्मुः सर्वे त ४० दिव्यैर्दिविभवैर्महर्षिभिर्नारदादिभिः ४१ इतिटीकायांमहिषासुरवधः तृतीयोध्यायः ३

शक्रादय इति तस्मिन्महिषे सुरारिबले दैत्यसैन्ये च देव्या निहते सति सुरगणास्तां देवीं वाग्भिस्तुष्टुवुरित्यन्वयः देव्या इति पाठे सुरगणाः देवाः की-
दृग्भूताः इत्यत आह । शिरोधरा ग्रीवा अंसाः बाहुमूलानि प्रणत्या नम्राः शिरोधरांसा येषां ते प्रहर्षपुलकोद्गमचारु हर्षजनितरोमोत्थानं तेन चारु
दी देहा येषां ते ॥१॥ इदं जगत् ब्रह्माण्डमात्मशक्त्या आत्मशक्त्यानिजेनाधिकस्वभावेन वैभवेनेत्यर्थः कथं तर्हि अस्याः मूर्तिस्तामित्यत आह निःशेष
देवगणशक्तिसमूहमूर्त्या च या समूर्तिर्देहः परिग्रहो यस्याः देवगणेभ्यः प्रागुत्पन्ना शक्तिरासीत् यद्वा ततं प्रकाशितं तत्सर्वमित्यर्थः
आत्मशक्त्या निजप्रभावेन निःशेषदेवगणशक्तिसमूहः तेजःपुञ्जः तदेव मूर्तिः कायो यस्याः सा तया भक्त्या एव कभावत्वात्सुरः स

ऋषिरुवाच शक्रादयः सुरगणा निहतेऽतिवीर्ये तस्मिन्दुरात्मनि सुरारिबले च देव्या तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा वाग्भिः प्रहर्षपु
लकोद्गमचारुदेहाः ॥१॥ देव्या यया ततमिदं जगदात्मशक्त्या निःशेषदेवगणशक्तिसमूहमूर्त्या ॥ तामम्बिकामखिलदेवमहर्षिपूज्यां
भक्त्या नताः स्म विदधातु शुभानि सा नः ॥२॥ यस्याः प्रभावमतुलं भगवाननन्तो ब्रह्मा हरश्च न हि वक्तुमलं बलं च सा चण्डिकाखिलजगत्परिपा
लनाय नाशाय चाशुभभयस्य मतिं करोतु ॥३॥ या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः पापात्मनां कृतधियां हृदयेषु बुद्धिः ॥ श्रद्धा
सतां कुलजनप्रभवस्य लज्जा तां त्वां नताः स्म परिपालय देवि विश्वम् ॥४॥ देव्यै नमः मातायै नमः नमः परमात्मने नमः शिवाय नमः

देवान् श्रीभावेन नताः प्रणताः स्म इत्यन्वयं स्म इत्यर्थे भक्त्या प्रणताः वयं देवेभ्यो बोधाय प्रविसर्जनीयेवा मातर्म्बिका नोऽस्माकं शुभानि विदधातु करोतु
॥२॥ प्रभावं प्रकृष्टस्वभावं अतुलमनन्यसाधारणं बलं सामर्थ्यं च वक्तुं वर्णयितुं न अलं न पर्याप्ता इत्यन्वयः अशुभभयकल्याणभयं भाविदुःख
प्रतिसंधिजन्मसु च अशुभस्य भयस्य नाशाय चेत्यन्वयः वैभाविकपुरुषकवक्रावः अशुभादि नाशे भयं तस्य नाशायेत्यन्वयः सुकृतिनां
पुण्यशीलानां भवनेषु गृहेषु या स्वयमात्मना पूर्वं तु पापं हरेत्यर्थः श्रीः संपद्दिव्यर्थः तथा पापात्मनां पापशीलानां भवनेष्वलक्ष्मीरि
त्यन्वयः तथा कृतधियां शुभासक्तानां करुणानां हृदयेषु सन्ततं करणेषु बुद्धिः अध्यवसायः यद्वा हृदये मनसि सद्बुद्धिः स्वर्गापवर्ग
साधनत्वात् तथा सतां आस्तिकानां आगमबोधितं तत्त्वावबोधव्यवसायः श्रद्धा कुलजनप्रभवस्य शुद्धसंतानजन्मनो जनस्य करणीयेषु प्रवृत्ते

दि ४

प्राचीनपत्र हेतुः ४

एतदेवस्तुतिपरं वचनं तत्त्वनिर्वचनमित्याह - किमिति नवरूपं स्वरूपं वर्णयामेति असमर्थेनायां पंचमी । असामर्थ्ये हेतुमाह अचिंत्यमिति सर्वेषु ब्रह्मरुद्रवरुणादिकेषु अचिंत्यमनिरूपणीयं सर्वोत्कृष्टत्वादित्यन्वयार्थः ॥ एतत्तु सिद्धं ॥ अतिवीर्यमनन्तसामर्थ्यं धारणसामर्थ्यं च तत्त्वं किं वर्णयामेत्यन्वयः । भूरिषु गुरुं देवदेव यानि चारुयेषु तव श्रुति चरितानि [illegible] तानि तानि च किं वर्णयामेत्यन्वयः । इदानीं समस्तकहेतुत्वे विपरिणामतः ॥ सचरितानि चापच्छेदः ॥ ५ ॥ मूलप्रकृतिमात्रतमेवेत्याशयः । हेतुरिति त्वं समस्तजगतां हेतुर्मूलकारणं तथापि त्रिमाह - त्रिगुणेति सत्त्वरजस्तमोमयी त्वेव । नन्वेवं रागादिसंबंधः स्यात् [illegible] सर्वकारणत्वे व्याघात इत्यत आह - अपीति त्रैगुण्येपि समस्तिदोषैः रागादिभिर्न ज्ञायसे नाविषयीक्रियसे इत्यर्थः । एवमपि परिच्छिन्न यामर्थकारणत्ता नोपपद्यत इत्याह हरिहरादिभिरिति अपारा च परी[illegible]

किं वर्णयाम तव रूपमचिंत्यमेतत् किं चातिवीर्यमसुरक्षयकारि भूरि ॥ किं चाहवेषु चरितानि तवाद्भुतानि सर्वेषु देव्यसुरदेवगणादिकेषु ॥ ५ ॥ हेतुः समस्तजगतां त्रिगुणापि दोषैर्न ज्ञायसे हरिहरादिभिरप्यपारा ॥ सर्वाश्रयाखिलमिदं जगदंशभूतमव्याकृता हि परमप्रकृतिस्त्वमाद्या ॥ ६ ॥ यस्याः समस्तसुरता समुदीरणेन तृप्तिं प्रयाति सकलेषु मखेषु देवि ॥ स्वाहासि वै पितृगणस्य च तृप्तिहेतुरुच्चार्यसे त्वमत एव जनैः स्वधा च ॥ ७ ॥ या मुक्तिहेतुरविचिंत्यमहाव्रता त्वमभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः । मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषैर्विद्या[illegible]

[illegible] नहि गन्तव्यभूमिरित्यर्थः । उक्तस्य हेतोरित्याह सर्वाश्रयेति परिच्छिन्नत्वे सर्वाश्रयत्वं स्यादित्यर्थः । सर्वाश्रयेति क्वचित्पाठः तत्र तु रूपे [illegible] गता सर्वस्याश्रयो यस्या इति बहुव्रीहिरित्यर्थः । कारणान्तरमप्यस्तीत्याह अखिलं जगदंशभूतमंशेनैकदेशेन भूतं [illegible] विकारापत्तिः [illegible] इत्याह अव्याकृतेति अव्याकृता विकारहीनेत्यर्थः । भूमिरापोनलो वायुः खं मनो बुद्धिरेव च अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा इति भगवद्गीतास्थित [illegible] प्रकृतिरित्यन्वयः । तस्याः विशेषणं परमेति परः परमात्मा मीयते ज्ञायते जीवभावेनाऽवच्छिद्यतेऽनयेति परमा परा [illegible] यस्याः स्वाहायाः समुदीरणेन [illegible] समस्तसुरतानिः [illegible] देवगणाः तृप्तिं प्रयाति [illegible] अतो हेतोः उच्चार्यसे पितृकर्मणि [illegible] ७ हे देवि [illegible] विद्यात्मिकासि भगवती [illegible] अत्रोपपत्तिमाह [illegible] भगवान् [illegible] अहिंसासत्यमस्तेयब्रह्मचर्यापरिग्रहा यमाः [illegible] जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतमिति हि [illegible]

शब्दात्मिका शब्दब्रह्मस्वरूपा ऋक् ऋग्वेदस्वरूपा यजुषि यजुर्वेदः सुविमलानि निर्दोषाणि वचनानि ऋग्यजुषां निधानमिति वचनं निधानमिति ऋग्यजुषां विधानमाश्रय इत्यर्थः अन्यपदार्थ वकुल्वचनं निधानमिति सूत्रस्थलिंगत्वात् आच्छादिताभावादिति उद्गीतं उद्गीथं तेन रम्यपदानां पाठो विद्यते येषु सामसु उद्गीथेति पाठे उद्गीथः साम्नां भक्तिविशेषः तेन रम्याणां पदानां स्वविशेषभाजां पाठो येषु तेषु उद्गीथोऽस्मदिति श्रुतेः यद्वा उद्गीथः प्रणवमन्त्रः तेन रम्यपदपाठवतामिति सर्वेषां विशेषणं उद्गीथः प्रणवमन्त्रः सर्वव्यापी निरंजन इति नैगमाभिधानात् ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा स्रवत्यनोंकृतं ब्रह्म परस्ताच्च विशीर्यत इति मनुस्मरणात् इत्थं त्रयी वेदत्रयरूपा त्वं अथर्वस्य शान्तिकपौष्टिकाभिचारकाम्यकर्मप्रयोगवत्त्वेनान्यभावात् पृथक् तद्विधाने देवयति सर्वान् प्रकाशयति स्तुवति येन व्यवहारयतीति देवी भगवती वीर्यश्रीज्ञानप्राप्तिनी सर्वप्राणिभ्योऽस्तीयस्मात् भवः संसारः तस्य भावनाय उत्पत्तये वार्त्ता कृष्यादिरूपा कृषिर्वाणिज्यं गोरक्षा तृतीयं पशुपालनं विद्या ख्याता महाभागवार्त्ता वृत्तिरुपाश्रयेति विष्णुपुराणात् येनात् परमार्तिहन्त्री पीडानिवारिका भवभावनाय संसारस्थित्यै त्रयी वार्त्तोपदेशात् तथा च श्रीशालाकृतिः समग्रादिनाम प्रतिष्ठते आदित्यात्

शब्दात्मिका सुविमलर्ग्यजुषां निधानमुद्गीथरम्यपदपाठवतां च साम्नाम्। देवी त्रयी भगवती भवभावनाय वार्त्ता च सर्वजगतां परमार्तिहन्त्री ॥१०॥ मेधासि देवि विदिताखिलशास्त्रसारा दुर्गासि दुर्गभवसागरनौरसङ्गा। श्रीः कैटभारिहृदयैककृताधिवासा गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा ॥११॥ ईषत्सहासममलं परिपूर्णचन्द्रबिम्बानुकारि कनकोत्तमकान्तिकान्तम्। अत्यद्भुतं प्रहृतमात्तरुषा तथापि वक्त्रं विलोक्य सहसा महिषासुरेण ॥१२॥ दृष्ट्वा तु देवि कुपितं भ्रुकुटीकरालमुद्यच्छशाङ्कसदृशच्छवि यन्न सद्यः। प्राणान्मुमोच महिषस्तदतीव चित्रं कैर्जीव्यते हि कुपितान्तकदर्शनेन ॥१३॥ देवि प्रसीद परमा भवती भवाय सद्यो विनाशयसि कोपवती कुलानि। विज्ञातमेतदधुनैव यदस्तमेतन्नीतं बलं सुविपुलं महिषासुरस्य ॥१४॥

वतेत्यपि त्वमेव प्रमाणम् ॥१०॥ अतो न मां भगवतैवावहदेवाय धात्रं त्वमेव विदितानां ज्ञातानां अखिलशास्त्राणां सारः तत्त्वं यया दुर्गा दुर्गः दुर्गमो भवसागरः संसारसमुद्रः तत्र नौः तरिः नौः पारगावसाधनं असंगा असक्ता प्रतिहतप्रसारा अनन्याहृतसंगा आसक्तिहीना नौर्नु कर्णधारवाहत्वात् सैव प्रहितार्थिनाशयाम्यासीः श्रीलक्ष्मीः कैटभारेः हरेः हृदये एकया अद्वितीयया कृतोऽधिवासो यया शशिमौलिः हरः तत्र कृता प्रतिष्ठा यया सा गौरी पार्वती त्वमेवेत्यन्वयः ११ ईषद्धासेन सहितं तेन ईषत् हासमिति वक्त्रविशेषणं ईषद्धासः पदस्य स्थानः अमलं निर्मलं परिपूर्णचन्द्रबिम्बानुकारि कनकस्योत्तमा कान्तिरिव कान्तिर्यस्य कनकोत्तमकान्तिः तया कान्तं मनोरमं तथापि प्रहृतमपि वक्त्रं विलोक्य महिषासुरेण प्रहृतं तदत्यद्भुतमत्यन्ताश्चर्यमित्यन्वयः आत्तरुषा गृहीतकोपेनेति महिषासुरविशेषणं ११ न च सा वक्त्रं न तथा कुपितं दृष्ट्वा तदा मरणं विस्मयकरं भ्रुकुट्या भालकौटिल्येन करालं भीषणं उद्यच्छशाङ्कस्य उदयकालीनचन्द्रस्य सदृशी छविः रुचिर्यस्य तादृशं ज्ञात्वा यन्न प्राणान्मुमोच तदतीव चित्रं आश्चर्यमित्यन्वयः कुपितो योऽन्तको यमस्तस्य दर्शनेनावलोकनेन १२ प्रसीद प्रसादं कुरु परमा उत्कृष्टा सानुग्रहा भावुकी यस्याः सा सद्या तत्क्षणं भवती भवाय उत्पत्तये परमेष्ठ भवतीति यावत्

चं॰ टी॰
२०

च॰ ग

सेमताः संमानभाजः सीदति अवसादं लभते धर्मपदं पुरुषार्थो ... गुरुपार्थवर्ग इत्यर्थः धान्याः श्लाघ्याः निभृताः विनीताः आत्मजभृत्यदाराः येषां ते १४ धर्म्या
णि धर्मादनपेतानि अत्यादृतो अतिश्रद्धावान् ततः कर्मणो हेतोः स्वर्गं प्रयाति स्वर्गलोकादिफलदात्री च भवती प्रसादात् भवत्या अनुग्रहात् कुतो हेतोरेषा नतु [illegible]
भवतीति विशेषणपदम् प्रमादात् समनुलताया नतु प्रभो हे देवि अमुना लोकत्रये इह स्वर्गे मोक्षे पीत्यर्थः तत्रेहिकं फलं ... कर्मोच्चारणं स्वर्गो ... [illegible]
मित्यानेरकता लोकद्वयसंनिकृष्टत्वात् अत्र इहलोके परलोके च १५ दुर्गे संकटे दारिद्र्यनिर्हरणा दुःखप्रशमिका त्वं देवनीये भयमनो ... [illegible]
धनतं दुःखं ... चित्तानि ... चित्ता त्वदन्या का नकापि इत्यर्थः १६ स्वचूर्णमात्रि ... [illegible]
प्रकृत्यादिवात्सतोयाचेगयचिरकालं नरकायेति ताद्दृश्यचतुर्थी पापं प्रतिकूलं कुर्वन्तु नाम ... [illegible]

ते संमता जनपदेषु धनानि तेषां तेषां यशांसि न च सीदति बन्धुवर्गः धन्यास्त एव निभृतात्मजभृत्यदारा येषां सदाभ्युदयदा भवती प्रसन्ना १४ धर्म्याणि देवि
सकलानि सदैव कर्माण्यत्यादृतः प्रतिदिनं सुकृती करोति स्वर्गं प्रयाति च ततो भवतीप्रसादाल्लोकत्रयेऽपि फलदा ननु देवि तेन १५ दुर्गे स्मृता हर
सि भीतिमशेषजन्तोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि दारिद्र्यदुःखभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता १६ एभिर्हतैर्ज
गदुपैति सुखं तथैते कुर्वन्तु नाम नरकाय चिराय पापं संग्राममृत्युमधिगम्य दिवं प्रयान्तु मत्वेति नूनमहितान् विनिहंसि देवि १७ दृष्ट्वैव किं न भवती
प्रकरोति भस्म सर्वासुरानरिषु यत्प्रहिणोषि शस्त्रं लोकान्प्रयान्तु रिपवोऽपि हि शस्त्रपूता इत्थं मतिर्भवति तेष्वपि तेऽतिसाध्वी १८ खड्गप्रभानिकरविस्फुरणैस्तथो
ग्रैः शूलाग्रकान्तिनिवहेन दृशोऽसुराणां यन्नागता विलयमंशुमदिन्दुखण्डयोग्याननं तव विलोकयतां तदेतत्

निहंसीत्यन्वयः अत्र आह न निषेधेनाम पापोऽभ्युप ...
गमे नूनमुत्प्रेक्षायां १७ दृष्ट्वैव आलोकेनैव दृष्ट्या च दर्शनेनेति पाठान्तरं न किं भस्म प्रकरोति किं तु शस्त्रं ... प्रहिणोषि व्यापारयसि लोकान् इह लोकादीन् शस्त्रैः
पूताः क्षीणपापाः शस्त्रैः पूतान् निर्जितानिति पाठान्तरं इत्थं एवं प्रकारा तेष्वरिष्वपि अतिसाध्वी परोपकारस्वरूपा नतु यत् खड्गप्रभानिकरो दीप्तिसमूह
स्तस्य विस्फुरणैः सर्वत्र प्रसरणैः उग्रैः भयानकैः कृत्वा शूलाग्रस्य शूलमुखस्य ... वाचित्वात् तस्य कान्तिनिवहेन कृत्वा असुराणां दृशः
चक्षूंषि कर्तॄणि यत् विलयं विनाशं न आगताः तदेतद्दृश्यमित्यशः हेतुगर्भविशेषणमाह अंशुमत् दीप्तिमत् इन्दुखण्डयोग्यं चन्द्रखण्डाङ्कि
ते तव आननं मुखं विलोकयतामित्यन्वयः ॥१९

राम॰
२०

दीप्तिसमूहेन

दुर्वृत्तवृत्तशमनं तव देवि शीलं रूपं तथैतदविचिन्त्यमतुल्यमन्यैः वीर्यं च हन्तृ हृतदेवपराक्रमाणां वैरिष्वपि प्रकटितैव दया त्वयेत्थं २० केनोपमा भवतु तेऽस्य पराक्रमस्य रूपं च शत्रुभयकार्यतिहारि कुत्र चित्ते कृपा समरनिष्ठुरता च दृष्टा त्वय्येव देवि वरदे भुवनत्रयेऽपि २१ त्रैलोक्यमेतदखिलं रिपुनाशनेन त्रातं त्वया समरमूर्धनि तेऽपि हत्वा नीता दिवं रिपुगणा भयमप्यपास्तमस्माकमुन्मदसुरारिभवं नमस्ते २२ शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च २३ प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि २४ सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते यानि चात्यन्तघोराणि तै रक्षास्मांस्तथा भुवम् २५ खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके करपल्लवसङ्गीनि तैरस्मान् रक्ष सर्वतः २६ ऋषिरुवाच एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नन्दनोद्भवैः अर्चिता जगतां धात्री तथा गन्धानुलेपनैः

दुर्वृत्तवृत्तशमनं दुर्जनचेष्टाखण्डनं शीलं चरितं रूपं सौन्दर्यं हन्तृ देवानां पराक्रमो यैः तेषां मृगाणामित्यर्थः इत्थं एवं सत्यपि द्रुया प्रस्त्वह रणालङ्कारा प्रास्तु द्वित्वा वित्तापि नोपि पूर्यन्ते २० अतिहारि मनोहरं कुत्र न कुत्रापि किं तु भुवनत्रये त्वय्येव त्वत्तः २१ नैरिपवोपि समरमूर्द्धनि रणप्रधानस्थाने हत्वा दिवं नीता हृत्वा उन्मदा दर्पिष्ठा अहङ्कारा येषु ते असुरा अरयः तेभ्यो यज्जातं भयं तदपि त्वया निरस्तमपनीतं तेनुभ्यं २२ २३ दक्षिणोदक्षिणभागे भ्रामणेन रक्ष ईश्वरि २४ करपल्लवसङ्गीनि हस्ताग्रसंस्थितानि सौम्यानि रम्याणि घोराणि संहारकारणानि अत्यर्थं तिपाठः २५ श्वानमते यथा तात ऋमुपामास २६ नन्दनोद्भवैः देवोद्यानजातैः गन्धैः श्रीवासादिभिः अनुलेपनैः श्रीखण्डादिभिः २७ श्रीरामाय रामचन्द्राय रामकृष्णायोगिने ॥ ससर्गो वियते येषां २६

दिव्यैर्मनोहरैः २८ भक्त्या अतिप्रीत्या शीघ्रातिशयेन प्रीतेति वा पाठः २९ द्विमेघ्या इति क्रियाविशेषणं गाणा रात्रात्मनेपदम् ३१ चित्तं वेदनं ज्ञानमिति यावत् भाद्यो क्रियाविधानात् ऋद्धिः उपचयः विभवः — ऐश्वर्यं नैरिखितमहार्थेन तया अर्थेन ऋद्धिभवतीति स्मरणात् धनकनकादिपरिग्रहार्थं धनं दारादयः पवनसम्पदः ॥ तासां ३२ वृद्धये उपचयाय यभेवेत्याद्यन्वयः ३३ भद्रकल्पारांकरेति नीतिभद्रा भद्रा चासौ काली चेति विग्रहः भद्रकारयिनी वन्दयिनी कार्यसंपादयित्री अनुग्रहिणी दुःखप्राप्तौ स्मृतानु स्मृता संकटात्मविमोचय

दु
चं.टी.
२१

ति

इतिह्रासानंतरंनिरूपयति गौरीपार्वतीशिवतनुसमुत्पन्नेदेहः शरीरंआसनेआसः अवस्थितिर्यस्याः सादेहासा गृहीतशरीरेतियावत् सागादितमाहात्म्या
गौरीपुनर्गृहीतदेहासातीयंयासमुद्भूता अभवदित्यन्वयः अथवागौर्यादेहःशरीरकोशएवदेहकारणंयस्याः सा गौरीदेहाशाकपा

भवत्याप्यमेलोनित्वंदृशेदिवौधूम्रधपितामहप्रसादसमुद्रीमसत्त्वाग्रणितान्सुरान् २८ प्रियंमांक्षिदपासर्वैयदस्मज्जोऽभिवांछितं
ददाम्यदेमतिप्रीत्यास्तवैरेभिः सुपूजिता २८ देवाऊचुः भगवत्याकृतंसर्वंनकिंचिदवशिष्यते यदयंनिहतः शत्रुरस्माकम
हिषासुरः ३० यदिचापिवरोदेयस्त्वयाऽस्माकंमहेश्वरी संस्मृतासंस्मृतात्वंनोहिंसेथापरमापदः ३१ यश्चमर्त्यः स्त
वैरेभिस्त्वांस्तोष्यत्यमलानने तस्यवित्तर्धिविभवैर्धनदारादिसंपदां ३२ वृद्धयेऽस्मत्प्रसन्नात्वंभवेथाःसर्वदांविके ३३ ऋषि
रुवाच इतिप्रसादितादेवैर्जगतोर्थेतथात्मनः तथेत्युक्त्वाभद्रकालीबभूवांतर्हितानृप ३३ इत्येतत्कथितंभूपसंभूतासायथापुरा देवी
देवशरीरेभ्योजगत्त्रयहितैषिणी ३४ पुनश्चगौरीदेहासासमुद्भूतायथाभवत् वधायदुष्टदैत्यानांतथाशुंभनिशुंभयोः ३५ रक्षणायच
लोकानांदेवानामुपकारिणी तच्छृणुष्वमयाख्यातंयथावत्कथयामिते ३६ इतिश्रीमार्कंडेयपुराणे

र्थिवादिवत्मध्यमपदलोपः ३५ देहविग्रहहेतुमाह वधायेतिदुष्टदैत्यानांधूम्रलोचनादीनां तेनुभं ३६ ३७ इतिटीकायांमहि
षासुरवधः समाप्तः ४

सप्त.
२१

005576

४४ इदानीं देव्या माहात्म्यांतरमाविर्भावयिष्यन्नंतराध्यायस्थितिरमितिद्वासांतरमवतारयति ऋषिरुवाच पुरेति शुंभनिशुंभाभ्यां कश्यपपुत्राभ्यां असुराभ्यां दनुजाभ्यां
तथा च वामनपुराणे कश्यपस्य दनुर्नाम भार्याभोद्द्विजसत्तमाः तस्याः पुत्रत्रयं जज्ञे सहस्राक्षाद्बलाधिकं ज्येष्ठः शुंभ इति ख्यातो निशुंभश्चापरोऽसुरः तृतीयो
नमुचिर्नाम महाबलपराक्रमः शुंभो निशुंभश्च तालवान्ननोऽरिः शीतलदर्शनतान् शचीपतेरिंद्रस्य मदो गर्वः बलं शक्तिः १ सूर्यतां सूर्यभावं सूर्यस्या
धिकारमित्यर्थः ऐन्दवं इन्दुसंबन्धिनं अधिकारं इतरविलक्षणक्रियाकलापं तथा कौबेरमथ याम्यं च वरुणस्य चाधिकारमित्यनुषज्यते २ पवनर्द्धिं वायोरधिका
रं तेनानंतरं देवास्तां देवीं संस्मरंतीत्यर्थः चिरमतीतापि पूर्वं वर्तमानतया स्वेषु पुरस्तात् अथ कस्मात् निहन्यते तथाह वरो विदितो मह ईश्वरः इति विनिर्धूताः धिक्कृ
ताः ३ त्रिदशाः अमरा यौवनतारुण्यदशावस्थायेषां देवानां निराकृताः निःसारिताः ४ कथं ते स्मरंतीत्याह तयेति तत्कारणमाह यथेति आपत्सु स्मृताः
तत्क्षणात् भवतीनां अखिलाः परमापदो नाशयिष्यामीत्यन्वयः ५ ततइति भवतिप्रतुष्टुवुरिति प्रणतोभक्तिश्रद्धातिशयलक्षणां ६ प्रकर्षमाचष्टे देव्या इति नमो

ऋषिरुवाच पुरा शुंभनिशुंभाभ्यामसुराभ्यां शचीपतेः त्रैलोक्यं यज्ञभागाश्च हृता मदबलाश्रयात् १ तावेव सूर्यतां तद्वदधिकारं तथैन्दवं कौ
बेरमथ याम्यं च चक्राते वरुणस्य च २ तावेव पवनर्द्धिं च चक्रतुर्वह्निकर्म च ततो देवा विनिर्धूता भ्रष्टराज्याः पराजिताः ३ हृताधिकारास्त्रिदशा
ताभ्यां सर्वे निराकृता महासुराभ्यां तां देवीं संस्मरंत्यपराजितां ४ तयास्माकं वरो दत्तो यथापत्सु स्मृताखिलाः भवतीनां क्षयिष्यामि तत्क्ष
णात्परमापदः ५ इति कृत्वा मतिं देवा हिमवंतं नगेश्वरं जग्मुस्तत्र ततो देवीं विष्णुमायां प्रतुष्टुवुः ॥ ६ ॥ ॐ नमो भगवते वासुदेवाय ॥ ॥

त्यायै महतो ब्रह्मादीनपि देवयति स्वर्गादिभिर्व्यवहारयति महादेवी तस्यै शिवं कल्याणं तद्योगित्वात् शिवा तस्यै प्रकृत्यै मूलप्रकृतिरूपायै सर्गशक्त्यादिरूपायै भद्र
मखिलपापिनां गणरक्षणां करोतीति भद्रा स्थितिशक्तिरूपायै नियताश्चित्तप्रणिधानभाजः स्मपादस्मरणे ७ रौद्रायै दारुणायै संहतिशक्त्यै इति यावत्
नित्यायै कालानवच्छिन्नायै गौर्यै गौरवर्णायै धात्र्यै जगत्पोषिकायै ज्योत्स्नायै प्रकाशकारिण्यै इंदुरूपिण्यै ज्योतिरूपायै ज्योत्स्नायाः
दाहपलक्षणत्वात् सुखायै परमानंदमय्यै कल्याण्यै कल्याणकारिण्यै वृद्ध्यै उपचयकारिण्यै सिद्ध्यै अणिमादिरूपायै नमो

ध्रुव

चं॰ टी॰ २२

नमः हूर्महत्वमुपः नैमर्त्तैभ्यस्तरशांकै नैमः वपदस्मातुरगामुपलक्षणत्वात् अपरस्माद् नैमभिरलक्ष्मीः स्वार्थैश्वर्या भूभृतां लक्ष्मैराजश्रियै शर्वाण्यै शिवधर्मिण्यै
नेनुभं ६ दुर्गायै दुर्गमा दुर्गम्यात् नामानां ज्ञानात् दुर्गमं करोति पारं यति पालयति इति दुर्गपारा परिच्छेदोऽस्याः इति वा देशकाल वस्तुपरिच्छेदा यावत् दुर्गास्सा
मानमक्षयति पारं करोतीति वा नैमस्सारायै सारोपलक्षयाति सर्वकारिण्यै समस्तकार्यं जातस्वीकाऽभ्ये ख्यातिर्यस्याः तथाऽनुभूति यद्वा यथा
यथावत् आत्मानुभूतिः सत्वगुणा तथा भेदज्ञानेऽख्यातिरित्यन्वयः तद्रूपायै कृष्णायै धूम्रायै कृष्णवर्णायोगिन्यै १ अतिसौम्यायै विद्याभावेन
संसारोच्छेदहेतुत्वात् अतिरौद्रायै अविद्याभावेन संसारकारणत्वात् जगत्प्रतिष्ठायै जगदाधाररूपायै देव्यै देवताकृत्यै कृत्यै क्रियात्म

नमो देव्यै महादेव्यै शिवायै सततं नमः नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम् ७ रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः ज्योत्
स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः ८ कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कूर्म्यै नमो नमः नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः
दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः १० अतिसौम्यातिरौद्रायै नमस्तस्यै नमो नमः ११ नमो
जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ११ या देवी सर्वभूतेषु विष्णुमायेति शब्दिता नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १२ ॥ श्रीरामायनमः

कार्य

सर्वभूतेषु सर्वप्राणिषु या प्रसिद्धा विष्णुमाया मूलाविद्या इति शब्दपदं शब्दिता सर्वैर्मम बुद्धिप्रतिपादिता तस्यै नमो नमः इत्यन्वयः त्रिनमः पदं
तु प्रसादनेन संभ्रमेण वा गद्गदं विषादे विस्मये हर्षे खेदे दैन्ये वधारणे प्रसादने संभ्रमे च द्वित्रिरुक्तं न दुष्यति इत्यन्ये आहः त्रिः प्रणामेन महत्फलं इत्येकस्या
स्त्रिर्नमस्कारः यथा त्रिःप्रदक्षिणं अन्यश्चाह पदत्रयेण कायिक वाचक मानसिक नमस्कारत्रयं दर्शितं विष्णुमाया हि सात्त्विकसत्त्व
यात्रिविधामिच्छन्तीति तत्र नमस्कारत्रयं तेभ्यः पदत्रितारम्भात् एवमुत्तरत्रापि स्वयंचाहक्रमः विष्णुमाया १ चेतना २ बुद्धि ३ निद्रा ४ क्षुधा ५ छाया ६ श
कि ७ तृष्णा ८ क्षान्ति ९ जाति १० लज्जा ११ शान्ति १२ श्रद्धा १३ कान्ति १४ लक्ष्मी १५ वृत्ति १६ स्मृति १७ दया १८ तुष्टि १९

२२

चेतनाऽन्तःकरणवृत्तिः १३ बुद्धिः अन्तःकरणं १४ निद्रा निरिन्द्रियप्रदेशे मनोलयः १५ क्षुधा आहारार्थिवधानकृत्यक्ततो रसादादैन्यं १६ छाया ... गर्भापुमाद्वा १७
शक्तिः सामर्थ्यमुत्साहो वा १८ तृष्णा आत्मीयस्वीकारेच्छा जलपानेच्छा इति वा १९ क्षान्तिरपकारिष्वनपकारचिकीर्षा २० जातिः

या देवी सर्वभूतेषु चेतनेत्यभिधीयते नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः १३ या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता नमस्तस्यै नम
स्तस्यै नमस्तस्यै नमो नमः १४ या देवी सर्वभूतेषु निद्रारूपेण संस्थिता नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः १५ या देवी सर्वभूतेषु
क्षुधारूपेण संस्थिता नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः १६ या देवी सर्वभूतेषु छायारूपेण संस्थिता नमस्तस्यै नमस्तस्यै नमस्त
स्यै नमो नमः १७ या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः १८ या देवी सर्वभूतेषु तृष्णारूपेण सं
स्थिता नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः १९ या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता नमस्तस्यै नमस्तस्यै नमस्तस्यै
नमो नमः २० या देवी सर्वभूतेषु जातिरूपेण संस्थिता नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः २१ या देवी सर्वभूतेषु लज्जारूपेण संस्थिता न
मस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः २२ या देवी सर्वभूतेषु शान्तिरूपेण संस्थिता नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः २३ या दे
वी सर्वभूतेषु श्रद्धारूपेण संस्थिता नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः २४ या देवी सर्वभूतेषु कान्तिरूपेण संस्थिता नमस्तस्यै नमस्तस्यै नम
स्तस्यै नमो नमः २५ या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः २६ या देवी सर्वभूतेषु वृत्तिरू
पेण संस्थिता नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः २७ या देवी सर्वभूतेषु धृतिरूपेण संस्थिता नमस्तस्यै नमस्तस्यै
नमस्तस्यै नमस्तस्यै नमो नमः २८ या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः २९

केषाञ्चिदाकारव्यवहारसाधनं २१ लज्जा स्वाकार्य (या देवी सर्वभूतेषु दयारूपेण संस्थिता नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ३०
विघ्नात्त्रासानभीः २२ शान्तिर्विषयोपरतत्वं २३ श्रद्धा आगमार्थसंप्रत्ययः २४ कान्तिः शोभा २५ लक्ष्मीर्धनादिसंपत् २६ वृत्तिर्जीव
नेप्रवृत्तिर्वा २७ धृतिरवसादवस्थाध्यवसायः
स्मृतिरनुभूतविषयज्ञानं २९ दयान्यदुःखप्र
हिहारेच्छा ३०

श्रीः ४

चंडी
२३

तृप्तिर[illegible]नधिगताभिलाषः ३१ पुष्टिः पुरुषार्थसाधनसामर्थ्यं ३२ माता देवादिसृष्टात्रीवर्णाभिमानिनी देवतामातेवं वा ३३ भ्रान्तिरनुभव
संभ्रमो यः अनवृत्तिनिवृत्तिस्त्वयायो वा ३४ अखिलेषु स्वर्गादिषु भूतेषु प्राणिषु इंद्रियाणां बुद्धिकर्मात्मकानां एकादशानां भूतानां पृथिव्यादीनां
पंचानां अधिष्ठात्री प्रवृत्तिनिवृत्तिकारणं तस्यै व्याप्त्यै देव्यै विभवस्वभावायै आत्मपूज्ये इतियावत् ३५ अत्र च तस्यै पदानामभ्यासोऽत्र

यादेवीसर्वभूतेषुतुष्टिरूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः ३१ यादेवीसर्वभूतेषुपुष्टिरूपेणसंस्थितानम
स्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः ३२ यादेवीसर्वभूतेषुमातृरूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः ३३
यादेवीसर्वभूतेषुभ्रांतिरूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः ३४ इंद्रियाणामधिष्ठात्रीभूतानामखि
लेषुया भूतेषुसततंतस्यैव्याप्त्यैदेव्यैनमोनमः ३५ चितिरूपेणयाकृत्स्नमेतद्व्याप्यस्थिताजगत् नमस्तस्यैनमस्तस्यैनमस्तस्यै
नमोनमः ३६ स्तुतासुरैःपूर्वमभीष्टसंश्रया त्तथासुरेंद्रेणदिनेषुसेविता करोतुसानःशुभहेतुरीश्वरी शुभानिभद्राण्य
भिहंतुचापदः ३७ यासांप्रतंचोद्धतदैत्यतापितैरस्माभिरीशाचसुरैर्नमस्यते याचस्मृतातत्क्षणमेवहंतिनःसर्वापदोभक्ति

२८ दुर्गा

अशक्तेर्गुणातीतत्वमाह चितिः प्रकृतिः चैतन्यं तद्रूपेण जीवभावेनेत्यर्थः अन्येतु विष्णुमायादिपंचविंशतिमन्त्रान्यभिदधति संख्या
साम्यात् तन्नसमीचीनमितिप्रसंगात् ३६ सुरैर्देवैः पूर्वमहिषासुरवधकाले अभीष्टसंश्रयात् अभिमतलाभाद्धेतोः इंद्रेणचकुदि
वसेषु प्रतिदिनं वा नोऽस्माकं शुभानि मंगलानि भद्राणि सुखानि शुभानि भद्राणि इत्यनिप्राय कल्याणानि वा ३७ सांप्रतं वेद

सप्तशती
२३

एवमुक्तरीत्यालयादेवुक्तानांसप्तम्यर्थेषष्ठी अनादरेषष्ठीवा देवान् अनादृत्य यथोद्भवार्थः संबंधेषष्ठीवा देवानामपि अभिमुखं
जाह्नव्यांगंगायां ३९ अस्याः पार्वत्याः शरीरकोषतोदेहावर्णिकाचर्मणा इतियावत् शरीरसमुदायादित्यन्ये ४० समस्तैः समुदि
तैः समेतैरितिवापाठः समरैरतो ४१ यद्यस्मात् कोशिकीतालव्यणकारवती कोशात्कीकोशिकपदंदं दस्रूकैरितिशब्दभे

ऋषिरुवाच एवंस्तवाभियुक्तानांदेवानांतत्रपार्वती स्नातुमभ्याययौतोयेजह्नुकन्यानृपनंदन। ३९ साब्रवीत्तान्सुरान्सुभ्रू
र्भवद्भिःस्तूयतेत्रिका शरीरकोशतस्तस्याः समुद्भूताब्रवीच्छिवा ४० स्तोत्रंममैतत्क्रियतेशुंभदैत्यनिराकृतैः देवैःसमस्तैःसमरे नि
शुंभेनपराजितैः ४१ शरीरकोशाद्यत्तस्याःपार्वत्यानिःसृतांबिका कौशिकीतिसमस्तेषुततोलोकेषुगीयते ४२ तस्यांविनि
र्गतायांतुकृष्णाभूत्सापिपार्वती कालिकेतिसमाख्याताहिमाचलकृताश्रया ४३ ततोंबिकांपरंरूपंबिभ्राणांसुमनोहरं
ददर्शचंडोमुंडश्चभृत्यौशुंभनिशुंभयोः ४४ ताभ्यांशुंभायचाख्यातात्यतीवसुमनोहरा काप्यास्तेस्त्रीमहाराजभासयंतीहिमा
चलं ४५ नैवतादृक्क्वचिद्रूपंदृष्टंकेनचिदुत्तमं ज्ञायतांकाप्यसौदेवीगृह्यतांचासुरेश्वर ४६ स्त्रीरत्नमतीवार्वंगीद्योतयंतीदि
शस्त्विषा सातुतिष्ठतिदैत्येंद्रतांभवान्द्रष्टुमर्हति ४७ यानिरत्नानिमणयोगजाश्वादीनिवैप्रभो त्रैलोक्येतुसमस्तानिसंप्रतंता
न्यासतेगृहे ४८ ऐरावतःसमानीतोगजरत्नंपुरंदरात् पारिजाततरुश्चायंतथैवोच्चैःश्रवाहयः ४९ नमः परमात्मने॥

द्दर्शनात् एषोदशादिवात्साधनं ४२ ४३ ततोहेतोः परंप्रकृष्टं रूपंसौंदर्यं बिभ्राणांधारयंती ४४ शुंभायेतिक्रियायोगेचतुर्थीभा
सयंतीदीपयंती ४५ ४६ स्त्रीरत्नमुत्तमस्त्री अजहल्लिंगत्वान्नपुंसकत्वं ४७ रत्नानिस्वजातिश्रेष्ठानि यद्यतश्रेष्ठंस्वजातौस्यात्तद्रत्न
मभिधीयतेइत्यभिधानात् मणयोरत्नादयः
भांति दीव्यंति विचंनइत्यर्थः ४८ ४९

विमानं देवयानं यद्वेधसो ब्रह्मणोऽद्भुतमासीत् तत् इहानीतं तेन त्वां गणोऽचल्वे तिष्ठतीत्यर्थः अद्भुतमाश्चर्यं देनकं विमानविशेषणं
यद्वा अद्भुतमाश्चर्यमेतत् नस्मात्त्वया प्राप्तं सो विमानमानीतमिति ५० महापद्मनामा किञ्जल्किनीनाम्नी अगणित किसरान्मालां ५१
तेऽङ्गणे गृहे तिष्ठतीत्यन्वयः स्यन्दनवरो रथमुख्यः प्रजापतेर्ब्रह्मणः अन्यत्राह वेधस इत्यनेन ब्रह्मणाउक्तत्वात् दक्षप्रजापतेर्देव
स्य ५२ उत्क्रान्तिर्मरणं ददातीति उत्क्रान्तिदा उत्क्रान्तो मरणकाले ध्यानिवं स्यतीति वा हे ईश प्रापदिग्ह्वेविद्यये प्रजनीत्यर्थः यद्वा परि

विमानं हंससंयुक्तमेतत्तिष्ठति तेऽङ्गणे रत्नभूतमिहानीतं यदासीद्वेधसोऽद्भुतं ५० निधिरेष महापद्मः समानीतो धनेश्वरात्
किञ्जल्किनीं ददौ चाब्धिर्मालाम्म्लानपङ्कजां ५१ छत्रं ते वारुणं गेहे काञ्चनस्रावि तिष्ठति तथायं स्यन्दनवरो यः पुरा
सीत्प्रजापतेः ५२ मृत्योरुत्क्रान्तिदा नाम शक्तिरीश त्वया हृता पाशः सलिलराजस्य भ्रातुस्तव परिग्रहे ५३ निशुम्भस्या
ब्धिजाताश्च समस्ता रत्नजातयः वह्निरपि ददौ तुभ्यमग्निशौचे च वाससी ५४ एवं दैत्येन्द्र रत्नानि समस्तान्याहृतानि ते
स्त्रीरत्नमेषा कल्याणी त्वया कस्मान्न गृह्यते ५५ ऋषिरुवाच निशम्येति वचः शुम्भः स तदा चण्डमुण्डयोः प्रेषयामास सुग्रीवं
दूतं देव्या महासुरं ५६ इति चेति च वक्तव्या सा गत्वा वचनान्मम यथा चाभ्येति सम्प्रीत्या तथा कार्यं त्वया लघु ५७ स तत्र ग
त्वा यत्रास्ते शैलोद्देशेऽतिशोभने तां च देवीं ततः प्राह श्लक्ष्णं मधुरया गिरा ५८

ग्रहे तेऽनेनेति परिग्रहो हस्तः तिष्ठतीति शेषः ५३
वाससी अग्निरीयोत्तरीये अग्निशौचे अग्निरिव शौचं नैर्मल्यं कारणं ययोस्ते अग्नेर्वा दीप्तिर्निर्मले भवतः अग्निरिव शौचं इति चेति च
उमुङवचनानुवादः कार्यकरणीयं लघु शीघ्रं ५७ स सुग्रीवः सा पत्रालं इत्यन्वयः देवीति प्रथमान्तपाठे पूर्वेणान्वयः श्लक्ष्णं
नुत्कटं मधुरया कोमलया ५८

[illegible]

त्वत्सकाशं त्वत्समीपं ५९ अव्याहताज्ञ आज्ञा यस्य तः देवयोनिषु विद्याधरादिषु सर्वास्विति अध्याहार्यम् स्त्रिलिंगत्वं निर्जिता अखिलदैत्यारयो
देवा येन ६० अखिलदैत्यारयो देवा वशानुगाः अनुविधायिनः वशा आयत्ताः अनुगाः कर्मधारयो वा पृथगिन्द्राद्यधिकारभेदेन ६१ त्रै
लोक्ये अन्येषां नाकिगजरत्नानि नानादेशप्रसिद्धानि मम वश्यानीत्यनुषज्यते अश्वरत्नं हृत्वा समानीय अमरैर्मम समर्पितमित्यर्थः ६२

दूत उवाच देवि दैत्येश्वरः शुम्भस्त्रैलोक्ये परमेश्वरः दूतोऽहं प्रेषितस्तेन त्वत्सकाशमिहागतः ५९ अव्याहताज्ञः सर्वासु यः सदा देव
योनिषु निर्जिताखिलदैत्यारिः स यदाह शृणुष्व तत् ६० मम त्रैलोक्यमखिलं मम देवा वशानुगाः यज्ञभागानहं सर्वानुपाश्नामि
पृथक् पृथक् ६१ त्रैलोक्ये वररत्नानि मम वश्यान्यशेषतः तथैव गजरत्नं च हृत्वा देवेन्द्रवाहनं ६२ क्षीरोदमथनोद्भूतमश्वरत्नं ममा
मरैः उच्चैःश्रवससंज्ञं तत्प्रणिपत्य समर्पितं ६३ यानि चान्यानि देवेषु गन्धर्वेषूरगेषु च रत्नभूतानि भूतानि तानि मय्येव
शोभने ६४ स्त्रीरत्नभूतां त्वां देवि लोके मन्यामहे वयं सा त्वमस्मानुपागच्छ यतो रत्नभुजो वयं ६५ मां वा ममानुजं वापि निशुं
भमुरुविक्रमं भज त्वं चञ्चलापाङ्गि रत्नभूतासि वै यतः ६६ परमैश्वर्यमतुलं प्राप्स्यसे मत्परिग्रहात् एतद्बुद्ध्या समालोच्य म

उच्चैःश्रवससंज्ञमिति नेहकोच वर्णागमः पक्षराजादेराकृतिगणत्वात् प्रातिहिको न यथा हरिवंशे आकाशस्यैर्दिवौकसैरिति ६३
रत्नानि श्रेष्ठानि स्थितानि वा शोभने शोभनदेहे ६४ ६५ उरुविक्रमं विक्रमातिशयभाजं भज आश्रय चञ्चलौ चपलस्वभा
वौ अपाङ्गौ नेत्रप्रान्तौ यस्याः वै प्रसिद्धौ ६६ मत्परिग्रहान्मदाश्रयणात् मत्परिग्रहतां मत्पत्नीत्वं ६७ श्रीरामायनमः श्रीराम

चं॰ टी॰ गंभीरं अंतः अभ्यंतरे स्मितं यस्याः सा जगौ उक्तवती माहात्म्या ६८ ६९ प्रतिज्ञातं संकल्पितं अल्पबुद्धित्वात् प्रतिज्ञा भ्रमोक्तिः ७० जयति
२५ रणे ऽभिभवति दर्पं बलवदभिमानं व्यपोहति नाशयति प्रतिबलः समानसामर्थ्यः पूर्वाभिभवे सतीति भावः ७१ तत्तस्मात् पाणिं गृह्णातु विवाहं करोतु ७२

ऋषिरुवाच इत्युक्ता सा तदा देवी गंभीरांतःस्मिता जगौ दुर्गा भगवती भद्रा ययेदं धार्यते जगत् देव्युवाच सत्यमुक्तं त्वया नात्र मिथ्या किंचित्त्वयोदितं त्रैलोक्याधिपतिः शुंभो निशुंभश्चापि तादृशः ६९ किं त्वत्र यत्प्रतिज्ञातं मिथ्या तत्क्रियते कथं श्रूयतामल्पबुद्धित्वात्प्रतिज्ञा या कृता पुरा ७० यो मां जयति संग्रामे यो मे दर्पं व्यपोहति यो मे प्रतिबलो लोके स मे भर्ता भविष्यति ७१ तदागच्छतु शुंभोऽत्र निशुंभो वा महासुरः मां जित्वा किं चिरेणात्र पाणिं गृह्णातु मे लघु ७२ दूत उवाच अवलिप्तासि मैवं त्वं देवि ब्रूहि ममाग्रतः त्रैलोक्ये कः पुमांस्तिष्ठेदग्रे शुंभनिशुंभयोः ७३ अन्येषामपि दैत्यानां सर्वे देवा न वै युधि तिष्ठंति संमुखे देवि किं पुनः स्त्री त्वमेकिका ७४ इंद्राद्याः सकला देवास्तस्थुर्येषां न संयुगे शुंभादीनां कथं तेषां स्त्री प्रयास्यसि संमुखं ७५ सा त्वं गच्छ मयैवोक्ता पार्श्वं शुंभनिशुंभयोः केशाकर्षणनिर्धूतगौरवा मा गमिष्यसि ७६ देव्युवाच एवमेतद्बली शुंभो निशुंभश्चातिवीर्यवान् किं करोमि प्रतिज्ञा मे यदनालोचिता पुरा ७७ स त्वं गच्छ मयोक्तं ते यदेतत्सर्वमादृतः तदाचक्ष्वासुरेंद्राय स च युक्तं करोतु तत् ७८ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये दूतवाक्यं नाम पंचमोऽध्यायः

अवलिप्ता लब्धा ७३ एकिकेति कुत्सायां कः ७४ संयुगे रणे केशाकर्षणेन निर्धूतं निरस्तं गौरवं यस्याः सा ७६ एवमेतदित्यादि पूर्वावलोकितः मे मया ७७ यत् यस्मात् आदृतः सयत्नः मयायदुक्तं तत् आचक्ष्व स च यत् युक्तं तत्करोतु इत्यन्वयः ७८ इति दूतवाक्यं
२५

अमर्षपूरितः कोपव्याप्तः समाचष्ट कथितवान् १ दैत्यानामधिपं सेनानायकं २ दुष्टां दुःशीलां केशाकर्षणविह्वलां केशाकर्षणेनाकुलीकृतां ३ उत्तिष्ठते समीहते उदात्तेऽदेशचेष्टायामात्मनेपदम् ४ असुराणां सहस्राणां षष्ट्याऽऽवृतः इत्यन्वयः दुतं सत्वरं ५ तुहिनाचलो हिमवान् मूलं समीपं मूलमायतिक
शिफाश्विति नामानुशासनात् ६

ऋषिरुवाच इत्याकर्ण्य वचो देव्याः स दूतोऽमर्षपूरितः समाचष्ट समागम्य दैत्यराजाय विस्तरात् १ तस्य दूतस्य तद्वाक्यमाकर्ण्यासुरराट् ततः सक्रोधः
प्राह दैत्यानामधिपं धूम्रलोचनं २ हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः तामानय बलाद्दुष्टां केशाकर्षणविह्वलां ३ तत्परित्राणदः कश्चि
द्यदि चोत्तिष्ठतेऽपरः स हन्तव्योऽमरो वापि यक्षो गन्धर्व एव च ४ ऋषिरुवाच तेनाज्ञप्तस्ततः शीघ्रं स दैत्यो धूम्रलोचनः वृतः षष्ट्या सहस्राणामसु
राणां द्रुतं ययौ ५ स दृष्ट्वा तां ततो देवीं तुहिनाचलसंस्थितां जगादोच्चैः प्रयाहीति मूलं शुम्भनिशुम्भयोः ६ ओं नमो भगवते वासुदेवाय
न चेत्प्रीत्याद्य भवती मद्भर्तारमुपैष्यति ततो बलान्नयाम्येष केशाकर्षणविह्वलां ७ देव्युवाच दैत्येश्वरेण प्रहितो बलवान्बलसंवृतः ॥
बलान्नयसि मामेवं ततः किं ते करोम्यहं ८ ऋषिरुवाच इत्युक्तः सोऽभ्यधावत्तामसुरो धूम्रलोचनः हुंकारेणैव तं भस्म सा चकाराम्बिका ततः ९
अथ क्रुद्धं महासैन्यमसुराणां तथाम्बिका ववर्ष सायकैस्तीक्ष्णैस्तथा शक्तिपरश्वधैः १० ततो धुतसटः कोपात्कृत्वा नादं सुभैरवं पपाता
सुरसेनायां सिंहो देव्याः स्ववाहनः ११ कांश्चित्करप्रहारेण दैत्यानास्येन चापरान् आक्रान्त्या चाधरेणान्यान्स जघान महासुरान् ॥ १२ ॥

चेद्यदि बलवान्सामर्थ्यवानिति सोत्कंठं बलसंवृतः सेनापरिवृतः करोमि कर्तुं शक्नोमि सा त्वं विक्रान्तं भस्म चकार इत्यन्वयः भस्म स्वरूपमि
ति वा पाठार्थौ ९ महासैन्यं सेनासमुदायः सायकैः शरैः परश्वधैः कुठारैः १० धुतसटः कंपितकेसरः पपात प्राविशत् स्ववाहनः इति वचनात्कर्मणि ल्युट् सोऽनन्यसाधारणो निजभूतो वाहनः आस्यादिपाठात् कर्त्तरि त्वं ११ आक्रान्त्या भयेन १२ श्रीरामचंद्र लेखनात् ॥

ॐ
चं॰टी॰
२६

कोष्ठानि हृदयानि केसरी सिंह तालो वा न्तां गलाप्रीतिः १३ १४ महात्मनेनामहोत्साहेन १५ क्षपितं क्षययुक्तं नारकदिव्यादित्तच् क्षयशब्दात्करोतीति इत्वंता
अनिष्ठा वा १६ तौ पूर्वोक्तौ १७ गछतेति छेदो नुनोधात् विंदुलोपश्छान्दसः द्वयोरेव वाचकं वचनं गौरवो न्यायात्पक्षे वा एवमुत्तरत्रापि गछतमित्यध्याहारः

केषांचित्पाटयामास नखैः कोष्ठानि केसरी तथा तलप्रहारेण शिरांसि कृतवान्पृथक् १३ विछिन्नबाहुशिरसः कृतास्तेन तथापरे पपौ च रुधि
रं कोष्ठादन्येषां धुतकेसरः १४ क्षणेन तद्बलं सर्वं क्षयं नीतं महात्मना तेन केसरिणा देव्या वाहनेनातिकोपिना १५ श्रुत्वा तमसुरं देव्या
निहतं धूम्रलोचनं बलं च क्षपितं कृत्स्नं देवीकेसरिणा ततः १६ चुकोप दैत्याधिपतिः शुंभः प्रस्फुरिताधरः आज्ञापयामास च तौ चंडमुंडौ म
हासुरौ हे चंड हे मुंड बलैर्बहुभिः परिवारितौ तत्र गछत गत्वा च सा समानीयतां लघु १७ केशेष्वाकृष्य बध्वा वा यदि वः संशयो युधिः
तदाशेषायुधैः सर्वैरसुरैर्विनिहन्यतां १९ तस्यां हतायां दुष्टायां सिंहे च विनिपातिते शीघ्रमागम्यतां बध्वा गृहीत्वा तामथांबिकां २० ॥
इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये धूम्रलोचनवधो नाम षष्ठोध्यायः ६ ॥ ॥ ॥ ॥ ॥ ॥ ॥

यदि इत्यादिना शीघ्रमागम्यतामित्यंतेन देव्या हननपक्षमनूद्य तत्प्राचीनमानयनपक्षं मुख्यत्वेनाह केशेष्वाकृष्य बध्वेति अथवा यदि वो न संशयस्तदा न-
देत्यर्थः तामंबिकां बध्वा गृहीत्वेत्यर्थः १९ अपरस्त्वाह तस्यां हतायां बलहीनायां अपरस्त्वाह सिंहे विनिपातिते सति तस्यां हतायां अमोघतायां २६
अत्र पक्षे हननं त्यर्थः शीघ्रमागम्यतामिति काकाक्षिवत्संबंधः २० इति धूम्रलोचनवधः षष्ठोध्यायः ६ ॥ ॥ ॥ ॥ ॥

चंडमुंडौ पुरोगमौ येषां ते ॥१॥ शैलेंद्रस्य हिमवतः शृंगे शृंगस्योपरि व्यवस्थितामित्यन्वयः कांचने सौवर्णे ते दैत्याः समादातुं गृहीतुं उद्यमं उद्योगं उद्यताः उत्साहिनः ३ अत्रै
रत्वर्थे मषीलिपि द्रवांत ह्मूर्णे छत्रमत्तरमित्यर्थः त्वाद्वालिर्व्याचगङ्गा गृध्रसीचमसीमसीत्यमरः ललाटफलकात् भालपुरः सरात् काली कृष्णवर्णा कोराल
मुन्नतं वदनं यस्याः सा तथा ५ खट्वांगं मायचर्षवत्तः नरमाला नृमुंडमाला तिभूषणं यस्याः नरेंद्रमूर्ध्नां सृजमुद्वहंतीति चामनपुराणादर्शनात् ।द्वीपी चित्रव्याघ्रः शु
ष्कमांसमनिर्मांसदेहा ६ जिह्वाया ल्ललनेन चलनेन अवलेहनेन वा भीषणा निमग्नानि कोटरीभूतानि आरक्तानि च नयनानि यस्याः सा ७ पार्ष्णिग्राहो गजस्य पश्चाद्भा
गस्थः पृष्ठरक्षकः अंकुशग्राही पूर्वभागस्थः ८ योधद्वयवाहं चर्वयति दंतैः पेषयंति अतिभरयत्क्रियाभिर्विशेषणात् ॥२॥ १० ।। ॐ नमः परमात्मने ॥

ऋषिरुवाच आज्ञप्तास्ततो दैत्याश्चंडमुंडपुरोगमाः चतुरंगबलोपेता ययुरभ्युद्यतायुधाः ॥१॥ ददृशुस्ते ततो देवीमीषद्धासां व्यवस्थितां सिंहस्योपरि शैलेंद्र
शृंगे महति कांचने ॥२॥ ते दृष्ट्वा तां समादातुमुद्यमं चक्रुरुद्यताः आकृष्टचापासिधरास्तथान्ये तत्समीपगाः ॥३॥ ततः कोपं चकारोच्चैरंबिका तानरीन्प्र
ति कोपेन चास्या वदनं मषीवर्णमभूत्तदा ४ भ्रुकुटीकुटिलात्तस्या ललाटफलकाद्द्रुतं काली करालवदना विनिष्क्रांतासिपाशिनी ॥५॥
विचित्रखट्वांगधरा नरमालाविभूषणा द्वीपिचर्मपरीधाना शुष्कमांसातिभैरवा ६ अतिविस्तारवदना जिह्वाललनभीषणा निमग्नारक्तनयना ना
दापूरितदिङ्मुखा ७ सा वेगेनाभिपतिता घातयंती महासुरान् सैन्ये तत्र सुरारीणामभक्षयत तद्बलं पार्ष्णिग्राहांकुशग्राहियोधघंटासमन्वितान्
समादायैकहस्तेन मुखे चिक्षेप वारणान् ॥९॥ तथैव योधं तुरगै रथं सारथिना सह निक्षिप्य वक्त्रे दशनैश्चर्वयंत्यतिभैरवं १० एकं जग्राह केशेषु ग्रीवायामथ चाप
रं पादेनाक्रम्य चैवान्यमुरसान्यमपोथयत् ११ तैर्मुक्तानि च शस्त्राणि महास्त्राणि तथासुरैः मुखेन जग्राह रुषा दशनैर्मथितान्यपि १२ बलिनां तद्बलं सर्वम
सुराणां महात्मनां ममर्दाभक्षयच्चान्यानन्यांश्चाताडयत्तदा १३ असिना निहताः केचित्केचित्खट्वांगताडिताः जग्मुर्विनाशमसुरा दंताग्राभिहतास्तथा
१४ क्षणेन तद्बलं सर्वमसुराणां निपातितं दृष्ट्वा चंडोऽभिदुद्राव तां कालीमतिभीषणां १५ शरवर्षैर्महाभीमैर्भीमाक्षीं तां महासुरः छादयामास चक्रैश्च मुंडः क्षिप्तैः सह
अपोथयत् ताडितवती ११ रुषा क्रोधेन १२ महात्मनां उदाराणां १३ १४ अभिदुद्राव अभिमुखं गतवान् १५ क्षिप्तैः प्रेषितैः चक्रैर्मुंडः सह सार्धं छादयामासेत्यन्वयः १६
तस्याः देव्या मुखं तत्सुखविशमानानि संति भुवः सुशुभिरे घनोदरे मेघांतरे अमृतोपमेयं ॥१७॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

भीमंभयंकरं यथा स्यात्तथा १८ महासिंहं महाश्वं उत्पपात उपरि दधावेति शेषोक्तौ कश्चिदाह हंतुमित्यस्यैनं कोपवर्णनाय अपरस्त्वाह महासिंहं उत्थाय आरूढव
नत्संगतं कात्यायनिहवाहनत्वाभावात् उत्तरत्र तेनासिनेति दर्शनाच्च यस्य चंडस्य तेन पूर्वोक्तेन १९·२·२१ मुंडमित्यव्ययवत्त्वस्य णेयामुंड समुंडा भीत्याभिद्रवतीत्यर्थे च

ततो जहासातिरुषा भीमं भैरवनादिनी काली करालवक्त्रांतर्दुर्दर्शदशनोज्ज्वला १८ उत्थाय च महासिंहं देवी चंडमधावत। गृहीत्वा चास्य केशेषु शिरस्तेनासि
च्छिनत् १९ अथ मुंडोभ्यधावत्तां दृष्ट्वा चंडं निपातितं तमप्यपातयद्भूमौ सा खड्गाभिहतं रुषा २० हतशेषं ततः सैन्यं दृष्ट्वा चंडं निपातितं तमप्यपातयद्
मौ मुंडं च सुमहावीर्यं दिशो भेजे भयातुरं शिरश्चंडस्य काली च गृहीत्वा मुंडमेव च प्राह प्रचंडाट्टहासमिश्रमभ्येत्य चंडिकां मयात्तवात्रोपहृतौ चंडमुंडौ
महापशू युद्धयज्ञे स्वयं शुंभं निशुंभं च हनिष्यसि २३ ऋषिरुवाच तावानीतौ ततो दृष्ट्वा चंडमुंडौ महासुरौ उवाच कालीं कल्याणी ललितं चंडि
कावचः २४ यस्माच्चंडं च मुंडं च गृहीत्वा त्वमुपागता चामुंडेति ततो लोके ख्याता देवी भविष्यसि २५ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे दे
वीमाहात्म्ये चंडमुंडवधो नाम सप्तमोध्यायः ७ ऋषिरुवाच चंडे च निहते दैत्ये मुंडे च विनिपातिते बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः १
ततः कोपपराधीनचेताः शुंभः प्रतापवान् उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह ॥ २ ॥ ॥ ॥

भिद्रवत्य आगत्य महाट्टहासं संयुक्तं वचः इत्यर्थः चंडिकां कौशिकीं २२ अत्र युद्धयज्ञे इत्यन्वयः महापशू इति रूपकाभिप्रायेण २३ कालीमुखभावो क
कल्याणीति कर्तृविशेषणं ललितं हृद्यं २४ चंडमुंडं चेति पूर्ववत् चामुंडेति पृषोदरादित्वात् २५ इति चंडमुंडवधः सप्तमोध्यायः ॥ ७ ॥
कोपेन पराधीनं अस्वाधीनं चेतो यस्य दैत्यानां यानि सर्वाणि सैन्यानि तेषामित्यन्वयः सर्वसैन्यानामिति दैत्यानां विशेषणं वा आदिदेश आज्ञा

[illegible]

षडशीतिरिति राजसमीपवर्तीमामंत्रामात्याभिप्रायेण उदायुधाः उद्यतायुधाः कम्बूनां कम्बुनाम्नां दैत्यकुलजातानां चतुर्भीरधिकाशीतिः आ ऽऽधिकार्थत्वात्‌ चतुरशीतिरितिपाठः कुलानीति परस्मात्‌ पूर्वत्र संबध्यते सिंहावलोकनन्यायात्‌ २ कोटिवीर्याणि कोटिवीरकुलोद्भवानि कुलानि हृदानि धौम्राणां धूम्रवंश्यानां ३
कालकाः कालवंश्याः मौर्याः मुरवंश्याः कालकेया कालका दैत्यपत्नी स्यात्‌ तस्या अपत्यानि स्त्रीभ्यो ढक्‌ कालकायां जाताः संज्ञाः सप्तामर्शिकाः निर्यान्तु आज्ञये
तिचिवक्ताधीनत्वात्‌ न संधिः ५ भैरवमत्युग्रं शासनमाज्ञा यस्य महान्ति सैन्यान्यत्रेति महासैन्यं सैन्यानां समुदाया तेषां सहस्रैः ६ धरणीगगनयोरन्तरं मध्यं ७ अ १४
तीवस्पष्टत्वं पुनरेकत्वं इति यावत्‌ उपबृंहयत्‌ आगमशासनमनित्यमडागमाभावः ८ धनुर्ज्या इति स्वभावाख्यानमात्रं ज्याघोषैरेव धनुर्ग्रहणात्‌ तेन धनुर्ज्यादीनां नादैरा
पूरितदिङ्मुखं यया निनादैः निनादे जित्वे जिगाय प्राचीनं नादानित्यन्वयः तिङन्ततिङ्‌ न्यायेनैव वृत्तम्‌ यद्वा शब्दापूरितदिङ्मुख्यापि काली देव्याः धनुर्ज्यासिंहघंटा

अद्य सर्वबलैर्दैत्याः षडशीतिरुदायुधाः कंबूनां चतुरशीतिर्निर्यान्तु स्वबलैर्वृताः ३ कोटिवीर्याणि पंचाशदसुराणां कुलानि वै शतं कुलानि धौम्राणां निर्गच्छन्तु म
माज्ञया ४ कालका दौर्हृदा मौर्याः कालकेयास्तथासुराः युद्धाय सज्जा निर्यान्तु आज्ञया त्वरिता मम ५ इत्याज्ञाप्यासुरपतिः शुम्भो भैरवशासनः निर्जगाम
महासैन्यसहस्रैर्बहुभिर्वृतः ६ आयान्तं चण्डिका दृष्ट्वा तत्सैन्यमतिभीषणं ज्यास्वनैः पूरयामास धरणीगगनान्तरं ७ ततः सिंहो महानादमतीव कृतवान्नृप घं
टास्वनेन तन्नादमम्बिका चोपबृंहयत्‌ ८ धनुर्ज्यासिंहघंटानां नादापूरितदिङ्मुखा निनादैर्भीषणैः काली जिग्ये विस्तारितानना ९ तन्निनादमुपश्रुत्य दैत्यसै
न्यैश्चतुर्दिशं देवी सिंहस्तथा काली सरोषैः परिवारिताः १० एतस्मिन्नन्तरे
भूप विनाशाय सुरद्विषां भवायामरसिंहानामतिवीर्यबलान्विताः ११ ब्रह्मेशगुहविष्णूनां तथेन्द्रस्य च शक्तयः शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः १२ यस्य देवस्य यद्रूपं यथाभूषणवाहनं तद्वदेव हि तच्छक्तिरसुरान्योद्धुमाययौ १३ हंस
युक्तविमानाग्रे साक्षसूत्रकमण्डलुः आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते १४ माहेश्वरी वृषारूढा त्रिशूलवरधारिणी महाहिवलया प्राप्ता चन्द्ररेखावि

नां निनादैर्जिग्ये जितवती प्राचीननादानित्यन्वयः इति कश्चित्‌ ९ चतुर्दिशं चतुर्दिक्षु काली त्वरभया सरोषैः सक्रोधैरिति पाठः अंते मध्ये यस्य भवाय संपदे अमरसिं
हानामिति सिंहशब्दः श्रेष्ठवचनः वीर्यं तेजः ११ ईशः शिवः गुहः कार्त्तिकेयः विष्णुशब्दोऽत्र वराहनृसिंहावपि संगृह्णीते शक्तयः स्वाव्यक्तिरूपिकेन्द्राद्वेवताभ्यः
तस्य तस्य रूपैः तद्रूपैः १२ एतदेव स्पष्टयति यस्येति यथाभूषणवाहनं भूषणवाहनानतिक्रमेण तत्तत्प्रापिधा १३ तदेवव्याकुरुते हंसेति अक्षसूत्रं जपमाला
ऽक्षमालिका १४ महाहीन्महासर्पान्‌ अम्बतरवलाकौ वलयौ कंकणौ यस्याः चन्द्रस्य रेखा कला विभूषणं यस्याः २१ ॥ ॥ ॥ ॥ ॥ ॥

शंखः पांचजन्यः चक्रं सुदर्शनं गदा कौमोदकी शार्ङ्गं धनुः धनुषः साहचर्याद्बाणोऽप्यत्रोक्तनीयः खड्गो नंदकः तेहस्ते यस्याः तथा च वामनपुराणे बाहुभ्यां गृह्यते चापं खड्गं
गदाहासिनी शार्ङ्गं बाणाधराज्ञानानाविमवीत्र पद्मालिनी पद्मेनाम्ना सा कुंभमभिश्रयते यश्चैश्चगमयो मुष्टिस्थमपि शार्ङ्गं खड्ग इति व्याख्याने नादर्पणगत
ननु धनुषः साहचर्याद्बाणा इति एवं साहचर्याद्धर्मं किं न्वोगृह्यत इति चेत् सत्यमनुजानाम्यहं तस्याश्चतुर्भुजत्वे दोषात् न चैकस्य भुजस्य शून्यत्वे दोषः
मा हेत्वयोः सर्वेकायुधमात्रोल्लेखदर्शनात् १७ यज्ञवाराहं यज्ञांगकल्पितं शूकराकारं धारयतीति हरिः अन्वयः वाराही घोरदंष्ट्राकारां तनुं बिभ्रती धारयन्ती १८
वपुः शरीरं सटा केशाः तस्याः क्षेपेण विक्षिप्ता नक्षत्रसंहतिर्यया १९ गजराजोपरि ऐरावतपृष्ठे स्थिता आगता २० असुरा हन्यन्तामित्याह इति साध्याहारो
न्वयः २१ शिवाशतानामसंख्यातशृगालीनां निनादेनान्विता २२ धूम्रजटिलं धूम्रजटावालिनं दूतत्वं दूतो वार्तावहः तद्भावो दूतत्वं गच्छेति केशका दिवत्

कौमारी शक्तिहस्ता च मयूरवरवाहना योद्धुमभ्याययौ दैत्यानम्बिका गुहरूपिणी १६ तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता शंखचक्रगदाशार्ङ्गख
ड्गहस्ताभ्युपाययौ १७ यज्ञवाराहमतुलं रूपं या बिभ्रतो हरेः शक्तिः साप्याययौ तत्र वाराहीं बिभ्रती तनुम् १८ नारसिंही नृसिंहस्य बिभ्रती स
दृशं वपुः प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः १९ वज्रहस्ता तथैवैन्द्री गजराजोपरि संस्थिता प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा २० ततः परि
वृतस्ताभिरीशानो देवशक्तिभिः हन्यन्तामसुराः शीघ्रं मम प्रीत्याह चण्डिकां २१ ततो देवीशरीरात्तु विनिष्क्रान्तातिभीषणा चण्डिकाशक्तिरत्युग्रा शि
वाशतनिनादिनी २२ सा चाह धूम्रजटिलमीशानमपराजिता दूत त्वं गच्छ भगवन्पार्श्वं शुम्भनिशुम्भयोः २३ ब्रूहि शुम्भं निशुम्भं च दानवावतिगर्वितौ
ये चान्ये दानवास्तत्र युद्धाय समुपस्थिताः २४ त्रैलोक्यमिन्द्रो लभतां देवाः सन्तु हविर्भुजः यूयं प्रयात पातालं यदि जीवितुमिच्छथ २५ बलावलेपा
दथ चेद्भवन्तो युद्धकाङ्क्षिणः तदागच्छत तृप्यन्तु मच्छिवाः पिशितेन वः २६ यतो नियुक्तो दौत्येन तया देव्या शिवः स्वयं शिवदूतीति लोकेऽस्मिंस्ततः
सा ख्यातिमागता २७ तेऽपि श्रुत्वा वचो देव्याः शर्वाख्यातं महासुराः अमर्षापूरिता जग्मुर्यत्र कात्यायनी स्थिता २८ ततः प्रथममेवाग्रे शरशक्त्यृष्टि

संबंधनीयं २३ तत्र शुम्भनिशुम्भान्तिके प्रयातेषु न एवं तत्र गच्छेति २४ २५ मच्छिवा मदीयाः शृगालाः चोष्णाकं पिशितेन मांसेन २६ दौत्येन दूतभावेन शाब्दिक
त्वमिणि भेय इति प्राप्ते क्वचिदौत्सर्गिकोऽपि यथा २७ ते शुम्भादयः शर्वाख्यातं शिवेन कथितं तालव्यादिशकारः शर्वः शिवः इति व्याख्यानात् यतो
यत्र सार्वविभक्तिकस्तस् २८ प्रथममादौ अग्रे तमुद्दिश्य ऋष्टिः खड्गः उत्कृष्टतनामर्षापूरिता इति नतानिर्दिष्टमनिष्ट्वाद्गुणाभावः केवल

पास्वधान्यपरस्मून् आध्मातं शब्दवत् धनुः तेनमुक्तैः शरैः ३० तस्याः देव्याः तस्याग्रतः इति काचिद्विसर्गलोपेपिसंधिः तस्यात्र
पाग्रतइतिवापाठः पे. णितान् मर्दितान् कुर्वतीति वै कल्पिकोत्वुषंगलोपाभावः सर्वेविधयः छंदसि विकल्प्यंत इति न्यायात् कु
र्वतीतिवापाठः ३१ वीर्यबलं ओजोऽवष्टंभः येनयेनप्रवेशेन स्मधावति इति स्मयोगात् इतीति वर्तमानता तेन ब्रह्माणी येनये
नस्प्रधावत् तेनतेनस्प्रवीत्यध्याकर्षादिन्यन्वयः ३२ ३३ ऐंद्र्याय कुलिशपातितेन ३४ ३५ आजौरणे अंबरमाकाशं ३६
साचतान् अर्दितान् बाणान्छूलचक्रपरश्वधान् विच्छेद लीलया लीलया ध्मातधनुर्मुक्तैर्महेषुभिः ३० तस्याग्रतस्तथाका
लीशूलपातविदारितान् खट्वांगपोथितांश्चारीकुर्वतीव्यचरत्तदा ३१ कमंडलुजलाक्षेपहतवीर्यान् हतौजसः
ब्रह्माणी चाकरोच्छत्रून्येनयेनस्मधावति ३२ माहेश्वरी त्रिशूलेन तथा चक्रेण वैष्णवी दैत्यान्जघानकौमारी तथा
शक्त्यातिकोपना ३३ ऐंद्रीकुलिशपातेन शतशो दैत्यदानवाः पेतुर्विदारिताः पृथ्व्यां रुधिरौघप्रवर्षिणः ३४ तुंडप्रहार
विध्वस्ता दंष्ट्राग्रक्षतवक्षसः वाराहमूर्त्या न्यपतंश्चक्रेण च विदारिताः ३५ नखैर्विदारितांश्चान्यान्भक्षयंती महासुरा
न् नारसिंही चचाराजौ नादापूरितदिग्गुवा चंडाट्टहासैरसुराः शिवदूत्याभिदूषिताः पेतुः पृथिव्यां पतितांस्तांश्चखा
दाथसा तदा ३७ इति मातृगणं क्रुद्धं मर्दयंतं महासुरान् दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः ३८ पलायनपरा
न्दृष्ट्वा दैत्यान्मातृगणार्दितान् योद्धुमभ्याययौ क्रुद्धो रक्तबीजो महासुरः ३९
चंडः उग्रः सकोपो वा अट्टहासैः शिवदूत्याऽभिदूषिताः सर्वतो दूषिताः सा शिवदूती ३० विविधैरभ्युपायैः महासु
रान् मर्दयंतं मातृगणं दृष्ट्वा इत्यन्वयः इ
त्यभ्युपायविशेषाणां नेशुः पययुः ३८

अस्यरक्तबीजस्यमेदिन्यामित्यधिकरणेसप्तमीपंचम्यंतपाठेतुल्यब्लोपेऽधिकरणेचोपसंख्यानंकर्त्तव्यमितिपंचमीनत्वपादानेजनि.
कर्तुः प्रकृतेरेवापादानत्वात् नचात्रमेदिनीप्रकृतिरक्तविंदोरेवतथात्वात् ४· सरक्तवीजः ४१ ४२ वीर्यप्रभावः बलंस्थौल्य
विक्रमःसामर्थ्यातिशयः ४३ समंसह अनुग्रमितिक्रियाविशेषणंवा ४४ ववाह सुस्राव छांदसत्वात्संप्रसारणाभावः व

रक्तविंदुर्यदाभूमौपतत्यस्यशरीरतः समुत्पतंतिमेदिन्यांतत्प्रमाणास्तदासुरः ४· युयुधेसगदापाणिरिंद्रशक्त्यासमं
ततः ऐंद्रीस्ववज्रेणरक्तबीजमताडयत् ४२ कुलिशेनाहतस्यासुग्बहुसुस्रावशोणितं समुत्तस्थुस्ततोयो
धास्तद्रूपास्तत्पराक्रमाः ४२ यावंतः पतितास्तस्यशरीराद्रक्तविंदवः तावंतः पुरुषाजातास्तद्वीर्यबलविक्रमाः
तेचापियुयुधुस्तत्रपुरुषारक्तसंभवाः समंमातृभिरत्युग्रशस्त्रपातातिभीषणं ४४ पुनश्चवज्रपातेनक्षतमस्यशिरो
यदा ववाहरक्तंपुरुषास्ततोजाताःसहस्रशः ४५ वैष्णवीसमरेचैनंचक्रेणाभिजघानह गदयाताडयामासऐंद्रीतमसुर
श्वरं ४६ वैष्णवीचक्रभिन्नस्यरुधिरस्रावसंभवैः सहस्रशोजगद्व्याप्तंतत्प्रमाणैर्महासुरैः ४७ शक्त्याजघानकौमारीवा
राहीचतथासिना माहेश्वरीत्रिशूलेनरक्तबीजंमहासुरम् ४८

गत्यावित्यनेनूपंवा वाहृप्रयत्नइत्यतोवाधातोरनेकार्थत्वात् रक्तंकर्त्तृवाहेति शब्दमाह चकारइतिचेनितंतोरक्तात् सहस्रशोसख्याताः ४५ समरेपुरोवैष्णवीएनमसुरेश्वरं
चक्रेणाभिजघानगदयाताडयामासच किंभूतंएनंपंद्रीतंऐंद्याः इंद्रशक्तेः शाकापात् इतिगत युद्धेपराक्रमेणापियुध्यं

तेइति ऐंद्रीगदयातंताडयामासइत्यन्वयः
ऐंद्रीगदयावाचातंताडयामासभक्षया
मासइत्यर्थः ४६ ४७ त्रिशूलेनत्रिशु

रक्तश्लोक ४८

२९

२९

अहनदिति गणाकृतमनित्यमिति विकरणालोपाभावः ४९ ५० उत्तमं निरतिशयं ५१ प्रकर्षेणाहन्यंते वध्यंते शत्रवः अत्रेति
प्राहोरणप्राङ्पूर्वाहन्तेरन्यतोपि चेति डः प्रत्ययस्तूपंतत्र प्राहेरणो सत्वं तावेगक्रातयाचस्कंदपुराणे हृष्यते रथेनकांचनांगेन प्र
यथौ प्राहमत्वराइति अत उवाचेत्यनेनपौनरुक्त्यं अथवा प्रकर्षेणाह सत्वरं इति क्रियाविशेषणम् त्वरात्वरा विशेषणम्

सचापिगदयादैत्यः सर्वा एवाहनत्पृथक् मातॄः कोपसमाविष्टो रक्तबीजो महासुरः ४९ तस्याहतस्य बहुधा
शक्तिशूलादिभिर्भुवि पपात यो वै रक्तौघस्तेनासंश्छतशोसुराः ५० तैश्चासुरासृक्संभूतैरसुरैः सकलं जग
न् व्याप्तमासीत्ततो देवा भयमाजग्मुरुत्तमम् ५१ तान्विषण्णान्सुरान्दृष्ट्वा चंडिकाप्राह सत्वरा उवाच कालीं चामुंडे
विस्तीर्णं वदनं कुरु ५२

अरणम् आदित्वादच् पद्मावरयानेरक्तो वर्णनाशः क्विचंतेनतीघांतेवा अन्यस्त्वाह चंडिकाप्राह अथ देवा भयमाजग्मुरिति
त्वगतेऽभूते ततः सत्वरासती विस्तरं वदनं कुर्विति कालीमुवाचेति विस्तरंततं ॥ ५२ ॥ श्रीरामजी ॥ श्री ॥ ॥

ॐ चं॰ टी॰ ३

रक्तविंदून्रुधिरविप्रुषः रक्तविंदोर्जातान्महासुरान् [illegible] वक्त्रेणप्रतीच्छगृहाणेत्यर्थः रक्तविंदोरितिजात्यपेक्षयाएकवचनम् जाताविति पाठान्तरेपि चैमाहि र
क्तो ग्रन्थः स्पष्टः रक्तविंदुः चेतनेयस्यसरक्तविंदुः रक्तबीजउच्यते वेगितात्वरावती ५३ तदुत्पन्नान्रक्तविंदुजातान् क्षयंगमिष्यतीत्यर्थः ५४ नचोत्पत्स्यन्तीति
व्यत्ययात्परस्मैपदम् ५५ असौरक्तबीजः तत्युद्धे ५६ वेदनांपीडांअल्पिकामप्यल्पामपि तस्यरक्तबीजस्य ५७ यतोयस्मात्देहात् अंगात् ततस्तस्मा
त् तच्छोणितंवक्त्रेणचामुण्डा वक्त्रेणसंप्रतीच्छतीत्यन्वयः ततोऽनन्तरंयतोगच्छत्तस्मात्स्थानात्छोणितमितिकेचित् समुत्पन्नाः जाताः मुखेचासुरोत्पत्तिः
मुखस्यापिपिण्डीपिबत्वात् अविरुद्धाः ५८ ऋष्टिभिरेकधारासिभिः ५९ चामुण्डयापीतंशोणितंयस्य ६० महीपालेतिसंबोधनंयास्तरथामन्त्रेण ६१

मच्छस्त्रपातसंभूतान्रक्तबिन्दून्महासुरान् रक्तबिन्दून्प्रतीच्छत्वं वक्त्रेणानेनवेगिना ५३ भक्षयन्तीचररणे तदुत्पन्नान्महासुरान् एवमेषक्षयंदैत्यः क्षी
णरक्तोगमिष्यति ५४ भक्ष्यमाणास्त्वयाचोग्रा नचोत्पत्स्यन्तिचापरे इत्युक्त्वातांततोदेवी शूलेनाभिजघानतं ५५ मुखेनकालीजगृहेरक्तबी
जस्यशोणितं ततोसावाजघानाथगदयातत्रचण्डिकां ५६ नचास्यावेदनांचक्रे गदापातोल्पिकामपि तस्याहतस्यदेहात्तु बहुसुस्रावशोणि
तं ५७ यतस्ततस्तद्वक्त्रेण चामुण्डासंप्रतीच्छति मुखेसमुद्गतायेस्य रक्तपातान्महासुराः ५८ तांश्चखादाथचामुण्डा पपौतस्यचशोणितं देवीशूले
नवज्रेणबाणैरसिभिरृष्टिभिः जघानरक्तबीजंतं चामुण्डापीतशोणितं सपपातमहीपृष्ठे शस्त्रसंघसमाहतः ६० नीरक्तश्चमहीपालरक्त
बीजोमहासुरः ततस्तेहर्षमतुलमवापुस्त्रिदशानृप ६१ [illegible] तेषांमातृगणोजातो
ननर्तासृङ्मदोद्धतः ६२ इतिमार्कण्डेयपुराणे रक्तबीजवधः सप्तमोध्यायः ८ राजोवाच विचित्रमिदमाख्यातं भगवन्भवतामम देव्याश्चरितमाहात्म्यं र
क्तबीजवधाश्रितं १ भूयश्चेच्छाम्यहंश्रोतुं रक्तबीजेनिपातिते चकारशुम्भोयत्कर्म निशुम्भश्चातिकोपनः २ ऋषिरुवाच चकारकोपमतुलं रक्तबीजेनिपातिते

तेषांतद्रक्तपानेनसंवर्धितयाजातोमातृगणोननर्तेत्यन्वयः असृजामदः क्षीवतातेनोद्धताःस्तरलइत्यर्थः ((शुम्भासुरोनिशुम्भश्चहतेष्वन्येषुचाहवे ॥३॥ ॥
अथवातेषामसुराणांअसृक्पानेजातोमदोद्धताजातोभूतःसन्नित्यर्थः ६२ इतिरक्तबीजवधः ८ राजातुरथः विचित्रमाश्चर्यमाख्यातंकथितं चरितस्यचेष्टि रामः
तस्यमाहात्म्यमौदार्यं यद्वाचरितेकर्मनिमाहात्म्यंप्रभावातिशयः १ भूयःपुनः २ अन्येषुधूम्रलोचनादिषुआहवेरणे ॥३॥ ॐ नमःपरमात्मने॥ श्रीरामः ३

स्वनवत्तपावृमिति ३४ उग्रदंष्ट्राभिर्दंष्ट्राभिः शिरोधरा ग्रीवा येषां उग्रमिति वा पाठे क्रियाविशेषणं ३५ निराकृताः निर्धूताः ३६ ३७ तयाखंडखंडं कृताः ३८ वि
नेशुः मृताः नष्टाः अपसृताः मृगाधिपः सिंहः इति नवमः प्राणसंमितं जीवितसमं १ बलेन योऽवलेपो गर्वस्तेन दुष्टा कारे दुर्विनीते वा हे दुर्गे या त्वं अतिमानिनी महाहंकारवती २

तस्य निःक्रामतो देवी प्रहस्य स्वनवत्ततः। शिरश्चिच्छेद खड्गेन ततोऽसावपतद्भुवि ३४ ततः सिंहश्चखादोग्रदंष्ट्राक्षुण्णशिरोधरान् असुरांस्तांस्तथा काली शि
वदूती तथापरान् ३५ कौमारीशक्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः ब्रह्माणीमंत्रपूतेन तोयेनान्ये निराकृताः ३६ माहेश्वरीत्रिशूलेन भिन्नाः पेतुस्तथापरे
वाराहीतुंडघातेन केचिच्चूर्णीकृता भुवि ३७ खंडंखंडं च चक्रेण वैष्णव्या दानवाः कृताः वज्रेण चैंद्रीहस्ताग्रविमुक्तेन तथापरे ३८ केचिद्विनेशुरसुराः के
चिन्नष्टा महाहवात् भक्षिताश्चापरे कालीशिवदूतीमृगाधिपैः ३९ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये निशुंभवधो
नाम नवमोऽध्यायः ९ ऋषिरुवाच निशुंभं निहतं दृष्ट्वा भ्रातरं प्राणसंमितं हन्यमानं बलं चैव शुंभः क्रुद्धोऽब्रवीद्वचः १ बलावलेपदुष्टे त्वं मा दुर्गे गर्वमा चंडी ४
वह अन्यासां बलमाश्रित्य युद्ध्यसे यातिमानिनी २ देव्युवाच एकैवाहं जगत्यत्र द्वितीया का ममापरा पश्यैता दुष्ट मय्येव विशंत्यो मद्विभूतयः ३ ऋ
षिरुवाच ततः समस्तास्ता देव्यो ब्रह्माणीप्रमुखा लयं तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदांबिका ४ ॐ नमो भगवते वासुदेवाय ॐ नमः परमात्म

ते४

एकाऽसजातीयविजातीयस्वगतभेदहीना के नि किमु शब्दः द्वेपेकापीति यावत् अपरा अन्या व्यतिरिक्तेति यावत् अनुभूयमानो वास्तव इत्याह पश्ये
तिपन्ना श्रास्तपणाद्या विशंत्यः अप्रत्ययात्कर्मणि प्रथमा यद्वा मय्येव विशंत्यः संतिपनत् पश्येति साध्याहारोन्वयः ३ ततो धारीरे लयमाश्लेषमपृथ
ग्भावं जग्मुरित्यन्वयः ४
मद्विभूतयो मवष्टकेयः ४

चं॰टी विभूत्यासैश्वर्येणात्मरूपैः रूपैरवस्थानं ५ पश्यतामिति अनादरे षष्ठी ६ तथास्त्रैर्भूयो महत् यद्वाभूयः पुनः ७ प्रागुक्तान् प्राणापिशुद्धमासीत् तत्प्रतीघातकर्तृभिरस्त्रैर्विधि
३७ विपरिणामेनान्वयः ८ तेनशुम्भेनलीलयानायासेन उग्रमिति क्रियाविशेषणम् समन्तपक्षे हुंकारोच्चारणादे विशेषणम् ९ तदित्यव्ययं तस्येत्यन्वयः १०

देव्युवाच अहंविभूत्याबहुभिरिहरूपैर्यदास्थिता तत्संहृतंमयैकैवतिष्ठाम्याजौस्थिरोभव। ५ ऋषिरुवाच ततःप्रववृतेयुद्धंदेव्याःशुम्भस्यचोभयोः प
श्यतांसर्वदेवानामसुराणांचदारुणं ६ शरवर्षैःशितैःशस्त्रैस्तथास्त्रैश्चैवदारुणैः तयोर्युद्धमभूद्भूय सर्वलोकभयंकरम् ७ दिव्यान्यस्त्राणिश
तशोमुमुचेयान्यथांबिका बभंजतानिदैत्येंद्रस्तत्प्रतीघातकर्तृभिः ८ मुक्तानितेनचास्त्राणिदिव्यानिपरमेश्वरी बभंजलीलयैवोग्रहुंकारोच्चा
रणादिभिः ९ ततःशरशतैर्देवीमाच्छादयतसोसुरः सापितत्कुपितादेवीधनुश्चिच्छेदचेषुभिः १० छिन्नेधनुषिदैत्येंद्रस्तथाशक्तिमथाददे छे॰४
चिच्छेददेवीचक्रेणतामप्यस्यकरेस्थितां ११ ततःखड्गमुपादायशतचंद्रंचभानुमत् अभ्यधावत्तदादेवींदैत्यानामधिपेश्वरः १२ त
स्यापततएवाशुखड्गंचिच्छेदचंडिका धनुर्मुक्तैःशितैर्बाणैश्चर्मचा[illegible]र्ककरामलं १३ हताश्वःसतदादैत्यश्छिन्नधन्वाविसा
रथिः जग्राहमुद्गरंघोरमंबिकानिधनोद्यतः। १४

तथातेनप्रकारेणधनुषिछिन्नइत्यन्वयः ११ शतचंद्रंकृत्रिमचंद्रशतान्वितंचर्मभानुमत्तेजस्वि दैत्यानांयेधिपास्तेषामधीश्वरः १२ अर्ककरामलंसूर्यरश्मि सप्तशती टी
वन्निर्मलं १३ हताश्वइत्यादिनाअस्मिन्नवसरे अश्वादिवधोप्यविधीयते हतासिरितिपाठःस्तनहृद्धसंमतः विसारथिरिति हयनियामकः मुद्गरंच[illegible] २४

उद्वहन् धारयन् अभ्यधावत् अभिमुखं ययौ अपि शब्दादितरेतरसमुच्चयार्थौ मुख्यया प्रधानभूतया ४ ५ ६ देव्येति हास्मार्थे तृतीया अस्त्रान् क्षिप्तान् ८ नि
शितं शाणोत्तेजितं चर्म फलकं ९ क्षुरप्रेणासिविशेषेण क्षुरप्रेणेति पाठः दृशनेन त्रिप्रत्युरस्त्रं वंडिज: धाविमतार्थे हिमदी द्वितीयार्थेति हरेश्चिना प्रादर्शनात्

हन्यमानं महासैन्यं विलोक्यामर्षमुद्वहन् अभ्यधावन्निशुंभोथ मुख्ययासुरसेनया ४ तस्याग्रतस्तथा पृष्ठे पार्श्वयोश्च महासुराः संदष्टौष्ठपुटाः
क्रुद्धा हन्तुं देवीमुपाययुः ५ आजगाम महावीर्यः शुंभोपि स्वबलैर्वृतः निहन्तुं चंडिकां कोपात्कृत्वा युद्धं तु मातृभिः ६ ततो युद्धमतीवासी
द्देव्याः शुंभनिशुंभयोः शरवर्षमतीवोग्रं मेघयोरिव वर्षतोः ७ चिच्छेदास्तान् शरांस्ताभ्यां चंडिका स्वशरोत्करैः ताडयामास चांगेषु शस्त्रौ
घैरसुरेश्वरौ ८ निशुंभो निशितं खड्गं चर्म चादाय सुप्रभं अताडयन्मूर्ध्नि सिंहं देव्या वाहनमुत्तमं ९ ताडिते वाहने देवी क्षुरप्रेणासिमुत्तमं निशुंभ
स्याशु चिच्छेद चर्म चाप्यष्टचन्द्रकं १० छिन्ने चर्मणि खड्गे च शक्तिं चिक्षेप सोसुरः तामप्यस्य द्विधा चक्रे चक्रेणाभिमुखागतां ११ कोपाध्मा
तो निशुंभोथ शूलं जग्राह दानवः आयान्तं मुष्टिपातेन देवी तच्चाप्यचूर्णयत् आविध्याथ गदां सोपि चिक्षेप चंडिकां प्रति सापि देव्या
त्रिशूलेन भिन्ना भस्मत्वमागता १३ ततः परशुहस्तं तमायान्तं दैत्यपुंगवं आहत्य देवी बाणौघैरपातयत भूतले १४ तस्मिन्निपतिते
भूमौ निशुंभे भीमविक्रमे भ्रातर्यतीव संक्रुद्धः प्रययौ हन्तुमंबिकां १५ स रथस्थस्तथात्युच्चैर्गृहीतपरमायुधैः भुजैरष्टाभिरतुलैर्व्याप्याशेषं बभौ
नभः १६ तमायान्तं समालोक्य देवी शंखमवादयत् ज्याशब्दं चापि धनुषश्चकारातीव दुःसहं १७ पूरयामास ककुभो निजघंटास्वनेन च समस्त
दैत्यसैन्यानां तेजोवधविधायिना १८ ततः सिंहो महानादैस्त्याजितेभमहामदैः पूरयामास गगनं गां तथैव दिशो दश १९ ततः का
लीसमुत्पत्य गगनं क्ष्मामताडयत् कराभ्यां तन्निनादेन प्राक्स्वनास्ते तिरोहिताः २० अट्टाट्टहासमशिवं शिवदूती चकार ह तैः शब्दैरसुरास्त्रेसुः शं

अष्टौ चन्द्रकाश्चन्द्राकाररचनाविशेषा यत्र १० ११ कोपेनाध्मातः प्रज्वलित मुष्टिपातेन मुष्टिप्रहारेण १२ आविध्य भ्रामयित्वा १३ दैत्यपुंगवं दैत्यमुख्यं
१४ प्रययौ शुंभ इति शेषः १५ स शुंभो नभो व्याप्य बभौ विभाति स्म वयः १६ १७ ककुभो दिशः तेजोवधविधायिना तेजोवधकरणशीलेन १८ त्याजितइभानां
गजानां महामदो यैः गगनमाकाशं गां स्वर्गं भुवं वा उपदिशः संग्राम एव नीदिक् प्रदेशाः उपदिक् सहिताः दिशः पाकपार्थिवादिवत् मध्यमप

पकं धादिताद्कारलोपः अत्यंवेर्हां सत्राशिवंत्राति
भीष्माणं जेतः उद्वेजिरे २१

दु
चं·टी·
३१

२२.२३ लोकत्रयस्य भूर्भुवः स्वर्लक्षणस्यांतरं मध्यं भुवर्लोक इति यावत् निर्घातनिःस्वनः उत्पातध्वनिः जितवान् अभिभूतवान् यो ता शुंभस्य सिंहनादभि
निघोषः यो ध्वनिः तेन तादृगप्यस्ति सिंहनादो निर्घातध्वनिना अभिभूत इत्यसंकुलं अथवा शुंभस्य तेन सिंहनादेन कृतो निर्घातनिःस्वनः उत्पातनित्य

दुरात्मंस्तिष्ठ तिष्ठेति व्याजहारांबिका यदा तदा जयेत्यभिहितं देवैराकाशसंस्थितैः २२ शुंभेनागत्य या शक्तिर्मुक्ता ज्वालातिभीषणा
आयांती वह्निकूटाभा सा निरस्ता महोल्कया २३ सिंहनादेन शुंभस्य व्याप्तं लोकत्रयांतरं निर्घातनिःस्वनो घोरो जितवानवनीपते।
२४ शुंभमुक्ताञ्छरान्देवी शुंभस्तत्प्रहिताञ्छरान् चिच्छेद स्वशरैरुग्रैः शतशोथ सहस्रशः २५ ततः सा चंडिका क्रुद्धा शूलेनाभिजघा
न तं स तदाभिहतो भूमौ मूर्छितो निपपात ह २६ ततो निशुंभः संप्राप्य चेतनामात्तकार्मुकः आजघान शरैर्देवीं कालीं केसरिणं तथा।
२७ पुनश्च कृत्वा बाहूनामयुतं दनुजेश्वरः चक्रायुधेन दितिजश्छादयामास चंडिकां २८ ततो भगवती क्रुद्धा दुर्गा दुर्गार्तिनाशिनी चि
च्छेद तानि चक्राणि स्वशरैः सायकांश्च तान् २९ ततो निशुंभो वेगेन गदामादाय चंडिकां अभ्यधावत वै हंतुं दैत्यसेनासमावृतः ३० त
स्यापतत एवाशु गदां चिच्छेद चंडिका खड्गेन शितधारेण स च शूलं समाददे ३१ शूलहस्तं समायांतं निशुंभममरार्दनं हृदि विव्या
ध शूलेन वेगाविद्धेन चंडिका ३२ भिन्नस्य तस्य शूलेन हृदयान्निःसृतोपरः महाबलो महावीर्यस्तिष्ठेति पुरुषो वदन् ३३ श्रीमा।

नं उत्पातध्वनिः अपि जितवान् जितः अभिभूतः कृत्यमिचारात् कर्मणि क्तप्रत्ययः २४ तत्प्रतिहतान् देव्या प्रेषितान् मूर्छितो विचेताः २६
आत्तं गृहीतं कार्मुकं धनुर्येन २७ २८ दुर्गार्तिः दुःसहाः पीडाः अथवा दुर्गे संकटे या आर्तिः तस्याः नाशिनी नाशनशीला नाशिनीति वा राम
पाठः सायकनिकृन् २९ ३० आपततः आगच्छतः ३१ वेगादाविद्धेनात्यर्थं भ्रामितेन ३२ तिष्ठेति वदन् अपरः पुरुषो हृदयान्निःसृ ३२
त इत्यन्वयः ३३

उत्पत्य प्रहाराभिमुखं कृत्वा १५ देव्या हृदये इत्यन्वयः सा देवी तं अपि तलेन प्रतलेन उरसि हृदये ऽताडयत् १६ सहसा तत्क्षणात् १७ उत्पत्य ऊर्ध्वं गत्वा प्रगृह्य आदाय उच्चैरत्यर्थं देवीं प्रगृह्य उच्चैः कृत्वा गगनमास्थितः इत्यन्वयः तत्र गगने अपि निराधारा स्वप्रयत्नेन पाताभाववद्धेतुहीना तेन शुम्भेन सह १८ नियुद्धं बाहुयुद्धं खे व्योम्नि चक्रतुः इति क्रियान्वितं परस्परं चेत्यात्मनेपदाभावः प्रथमं प्राक् सिद्धाः देवयोनिविशेषाः १९ तामः

पि॰ चिच्छेदापततस्तस्य मुद्गरं निशितैः शरैः तथापि सोऽभ्यधावत्तां मुष्टिमुद्यम्य वेगवान् १५ स मुष्टिं पातयामास हृदये दैत्यपुंगवः देव्या-
स्तं चापि सा देवी तलेनोरस्यताडयत् १६ तलप्रहाराभिहतो निपपात महीतले स दैत्यराजः सहसा पुनरेव तथोत्थितः उत्पत्य
च प्रगृह्योच्चैर्देवीं गगनमास्थितः तत्रापि सा निराधारा युयुधे तेन चण्डिका १८ नियुद्धं खे तदा दैत्यश्चण्डिका च परस्परं चक्रतुः प्रथमं सिद्ध-
मुनिविस्मयकारकं १९ ततो नियुद्धं सुचिरं कृत्वा तेनाम्बिका सह उत्पात्य भ्रामयामास चिक्षेप धरणीतले २० स क्षिप्तो धरणीं प्रा-
प्य मुष्टिमुद्यम्य वेगितः अभ्यधावत दुष्टात्मा चण्डिकानिधनेच्छया २१ तमायान्तं ततो देवी सर्वदैत्यजनेश्वरं जगत्यां पातयामा- उ॰
स भित्त्वा शूलेन वक्षसि २२ स गतासुः पपातोर्व्यां देवीशूलाग्रविक्षतः चालयन् सकलां पृथ्वीं साब्धिद्वीपां सपर्वतां २३ ततः
प्रसन्नमखिलं हते तस्मिन् दुरात्मनि जगत्स्वास्थ्यमतीवाप निर्मलं चाभवन्नभः २४

उत्पात्य ऊर्ध्वं नीत्वा उत्पाट्येति वा पाठः धरणीतले धरणीपृष्ठे वा धः स्वरूपयोरिति नयोः समानात् २ वेगितो वेगयुक्तः २१ जग- २८
त्यां पृथिव्यां २२ गतासुर्मृतः ऊर्व्यां भूमौ शूलाग्रेण शूलमुखं अग्रपदस्यापि मुखवचनत्वात् देव्याः शूलाग्रेणाविक्षतः विशेषेण व्रणितः
चालयन् कंपयन् संज्ञापूर्वकत्वाद्वृद्ध्यभावः चलनेचालस्तं करोतीति णिजिति तादृशात् शतृ २३ अखिलमशेषं प्रसन्नं प्रकाशीकृतं स्वा-
स्थ्यमनाविलत्वं आप प्राप्तं निर्मलं प्रसन्नेन

स॰ टी॰ क॰

उत्पातमेघाः उत्पातसूचकामेघाः उल्कादिवमुल्काः प्राक्सुभादिवधात् शामसुपशांतिं शरित्तोनद्यः मार्गवाहिएयः स्वमार्गगामिन्यः नाहिप्रागुत्पथगामिन्यः क्वासन्
समभवन् नवसुमेनिपातितमारितेसति २५ हर्षेणानिर्भरं पूर्तंमानसंयेषांयभूवुरितिपूर्वेणान्वयः ललितंसचिनोक्वा संजगुः गानंचक्रुः २६ क्वयादयन्
वाद्यंचक्रुः पुरस्याश्चरकूला २७ शांताः प्रागुपशांतापेम्रयेस्तेजज्वलुरित्यन्वयः यद्वा शांताः सेन: दिहुजनितः स्वनोयेषांप्रागेवदिग्वहते कुर्वीयाश्च प्रयोरि

उत्पातमेघाः सोल्कायेप्रागासंस्तेसमेययुः शरितोमार्गवाहिएयस्तथासंस्तत्रिपातिते २५ ततोदेवगणाः सर्वेहर्षनिर्भरमानसाः बभूवु
र्निहतेतस्मिन् हर्षगंधर्वाललितंजगुः २६ अवादयंस्तथैवान्येननृतुश्चाप्सरोगणाः ववुः पुएयास्तथावाताः सुप्रभोभूद्दिवाकरः २७
जज्वलुश्चाग्नयः शांताः शांतदिग्जनितस्वनाः २८ इतिश्रीमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येशुंभवधः दशमोध्यायः १०
ऋषिरुवाच देव्याहतेतत्रमहासुरेंद्रे सेंद्राः सुरावह्निपुरोगमास्तां कात्यायनींतुष्टुवुरिष्टलाभाद्विकाशिवक्त्राब्जविकाशिताशा १

दिहुस्व निमवंतः यद्वा शांता: दिहुजनितःस्वनोयेषांतेसमय: नास्त्याहव: गतमिहर: अंगारिणीदिश्वविविप्रकुकायस्यां रवितिष्टतिसाप्रदीप्ता प्रधूमिता
यास्यांति यांदिनेशः शेषास्तुशांताः शुभदाश्चताःस्युरिति २८ इतिशुंभवधः दशमोध्यायः १० तत्रतस्मिन्शुंभहतेयावत् इष्टस्यश्रमनार्थस्यला
भात्प्राप्तेः लभादितिपाठः विकाशानंविकाशः सोऽस्यास्तीतिविकाशि। विकाशिनांवक्त्राणांमस्तुभिः रश्मिभिर्विकाशिता दीपिताश्चाशा
दिशोयैस्तेविकाशिवक्त्रा स्त्विविनिपाठे विकाशीनिवक्त्राणियेषांतेतथा विकाशिनानिगतान्याशाप्रत्याशायेषांवा १ श्रीरामजीसहाइ

नमस्तेकं कर्मकर्तृत्वं चस्यात् अथ काकीदृशीत्यनिर्वचनीयात्वमिति यावत्तर्हि प्रस्तुतमप्रस्तुतमित्याहः तेस्तुतिरिति स्तुतिरेवेयं तेषोचाभ्युपगमेन क्रियाहृद्
तिनाप्रस्तुतमित्याशयः यद्वा तेतव स्तुतिरपित्वमेव कृतइत्याह तत्त्यात्तव्यविषया परापरोक्तिः पराभिधा वाक्काणारीय यत्तत्त्वमेव पश्यन्तीति प्रत
मर्षीर्थीपरावाक् स्वरचोदिता सैषा सा चात्तवचोक्ता हृदये परमेष्ठिन इति एव परमोक्तिः पश्यन्ती मध्यमा वैखरीरूपाच लक्षणां चागमांतरप्रसिद्धं
तथा च सूक्ष्मा कुंडलिनी मध्ये ज्योतिर्मात्रा ह्यणीयसी अश्रोत्रविषया तस्मादुज्जन्मगामिनी स्वयंप्रकाशा पश्यन्ती सुषुम्नाश्रितामवेत्
सैव हृत्पंकजं प्राप्य मध्यमा नादरूपिणी। चैत. संकल्पमात्रा स्यात् अविभक्तोर्ध्वगामिनी सैवोरः कंठतालुस्था शिरोघ्राणद्विजोष्ठगाः
जिह्वाग्रदंतोष्ठनिस्सृतवर्णव्यूहपरिग्रहा शब्दप्रपंचजननी श्रोत्रग्राह्यातु वैखरीति सेयं चतुर्विधा वाक् श्रुतावपि पठ्यते चत्वारि वाक्प
रिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः गुहा त्रीणि निहिता नेंगयंति तुरीयं वाचो मनुष्या वदंतीति एवं परस्वभावापि भवतीशस्मो
वेनापि विवर्तते इति स्तुतिरपीति भावः ५

प्रपन्ना भक्तास्तेषामार्त्तिं दुःखं हरतीत्यपि च प्रसीदेति च संभ्रमे द्विरुक्तिः ईश्वरी स्वतंत्रा चराचरस्येति निर्द्धारणे षष्ठी २ अपां स्वरूपस्थितयेति तत्कोपि रू-
त्यादिवदर्थः सूत्र्या षष्ठी जलस्वरूपेणेत्यर्थः एतत्कृत्स्नमशेषं व्याप्याप्यते स्फीतीक्रियते अलंघ्यवीर्ये अनन्यलंघनीयप्रभावे ३ वैष्णवी ईश्वरी वी-
जं मूलं कारणं परमा निरतिशया माया विद्याशक्तिः असि भवसि एतत्समस्तं जगत् संमोहितं सम्यक् मोहविषयीकृतं त्वयेति शेषः भुवि अ-
ति मुक्तिहेतुर्विद्याभावेन ४ विद्या वेदादिलक्षणाः समस्ताः अष्टादश प्रस्थितया अंगानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः धर्मशास्त्रं पुराणं

देवी प्रपन्नार्त्तिहरे प्रसीद प्रसीद मातर्जगतोऽखिलस्य प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य २ आधारभूता जगतस्त्वमेका मही-
स्वरूपेण यतः स्थितासि अपां स्वरूपस्थितया त्वयैतदाप्यायते कृत्स्नमलंघ्यवीर्ये ३ त्वं वैष्णवी शक्तिरनंतवीर्या विश्वस्य बीजं परमासि माया
संमोहितं देवि समस्तमेतत्त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ४ विद्याः समस्तास्तव देवि भेदाः स्त्रियः समस्ताः सकला जगत्सु त्वयैकया पूरितमंब-
(येतत्का ते स्तुतिः स्तव्यपरापरोक्तिः ५ ॥ ॥

च विद्या ह्येताश्चतुर्दश आयुर्वेदो धनुर्वेदो गांधर्वश्चेति ते त्रयः अर्थशास्त्रं चतुर्थं च विद्या ह्य-
ष्टादशैव ताः इति तद्भेदाः इति भिन्नप्रकाराः इति काकाक्षिवदन्वयः सकलाः कलाभिः सह वर्त्तमानाः नाम्ना लिंगेनार्थ्यानुष्ठिः एतज्जगत्त्वयैक-
या पूरितं अभिव्याप्तं एवं च तेन तव का स्तुतिः अपि त्वपि तु न कापीत्यर्थः कुत इत्याह स्तव्येति स्तव्यस्य परापरोक्तिः मुख्यगौणकीर्त्तनं चानुवाद एवेति का तेषु
तिरिति भावः यद्वा स्तव्यपरापरोक्तिः स्तुतिरित्युक्तं न चासौ निर्वहति भवत्याः सर्वव्यापित्वेनास्माभिर्भेदाभावात् स्तव्यभेदसाध्यत्वात् स्तव्यास्तव्य-
विषयापरापरोक्तिः

सर्वभूतं त्वां प्रियया सा तत्त्वात्स्वर्गादिव्यनुभाव्यं सर्वं मुक्तिकायत्वापायः तेप्रदातुं शीलं यस्याः एवं यदा तदा अस्माभिः स्तुता त्वमित्यन्वयः परोक्तिर्वेदादेर्वा शब्दः
पद्यान्तरे अथवा का परमोक्तयः प्रधाना वाचस्तव स्तुतये भवन्तु न कापीति यावत् कश्चिदाह सर्वभूता यदा सर्वप्राणिनां शुभाशुभभागप्रदात्वा मित इति ६ तत्
याप्यस्तु पराम्परस्थलत्वमपुनरुक्त्याद सर्वस्येति अपवर्गो मुक्तिः नाराः आपोऽयनं निलयोऽस्येति नारायणः परमात्मा तस्येयं शक्तिर्नारायणी तस्याः सं बुद्
धौ नेतुभ ७ कलात्रिंशत्काष्ठात्मकः कालः काष्ठाष्टादशनिमेषात्मक आदिर्निमेषमुहूर्ताद्युपसंग्रहार्थः विश्वस्य जगतः परिणामोऽव
स्थाभावो रूपान्तरापत्तिरितियावत् उपरतौ स्वरूपनाशे शक्ते आशक्ते आहृते इत्यर्थः नालखपाठसमर्थेदं सर्वेषां मङ्गलादीनां यन्मां ग

सर्वभूता यदा देवी स्वर्गमुक्तिप्रदायिनी त्वं स्तुता स्तुतये का वा भवन्तु परमोक्तयः ६ सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते स्वर्गापवर्ग
दे देवी नारायणि नमोऽस्तु ते ७ कलाकाष्ठादिरूपेण परिणामप्रदायिनि विश्वस्योपरतौ शक्ते नारायणि नमोऽस्तु ते ८ सर्वमं
गलमाङ्गल्ये शिवे सर्वार्थसाधिके शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ९ सृष्टिस्थितिविनाशानां शक्तिभूते सनातनि गु
णाश्रये गुणमये नारायणि नमोऽस्तु ते १० ॥ ॥

गल्यं मङ्गलभाववद्रूपे मङ्गलानामपि मङ्गलं त्वमेवेत्यर्थः शिवे कल्याणकारिणि
शरण्ये शरणार्हे त्र्यम्बके त्र्यक्षयस्ते इतियावत् त्र्यम्बाः संबोधने त्रीणि अम्बकानि नेत्राणि यस्याः त्रिणं दृष्टिः दृशो द्वे वदेपो लोचनमं विका मित्यभिधा
नात् गौरि गौरवर्णे ९ सृष्ट्यादीनां शक्तयो ब्रह्मादिरूपात्मिकाः तद्भूते तत्स्वरूपे सनातनि नित्ये गुणाश्रये पुरुषभावेन साहि प्रधानोपहितन्द्वि
तत्त्वाद् आधिकरणं भवति गुणमये प्रकृतिभावेन साहि सत्त्वरजस्तमसां साम्यावस्था यद्वा गुणाश्रया ब्रह्मादिभावेन गुणमया श
क्त्यादिभावेन स्वरूपमप्रद्विधानात् तद्भिन्ना नानाविधाः प्रत्ययाः स्मृतिः महाभाष्यास्मरणात् ड्याप्प्रत्ययः १० ॥ ॥ ॥ ॥

दीना· कृशकादिद्रुःखभाजः आर्त्ता रोगादिपीडिता· शरणागताश्चते दीनार्त्तास्तेषां परित्राणं परायणमभीष्टं यस्याः परायणमभीष्टे स्यात् तत्परानुयोरपिइति नामदर्पणात ११ कुशास्पदमंभः कौशांभः कुशमंत्रितं जलं तत् क्षरंती सिंचंती त्वार्षस्त्वप्रत्ययः १२ चंद्रश्चंद्रकलेश· अहिः सर्पः माहेश्वरीस्वरूपेणेति पूर्वोत्तरेणान्वयः १३ मयूरैः कुक्कुटैश्चवृत्ते वष्टिते धृते इतिपाठे मयूरकुक्कुटौ धरंतीति कर्त्तरिक्तः· अघं पापं दुःखं च तद्धीने अनघे १४ शंखादीनि गृहीतानि परमायुधानि च यया विधायुधेतिपाठः १५ १६ कृतः उद्यमः उद्योगो यया त्रातित्राणं हितेन सहवर्त्तत इति सहिता चेति विग्रहः १७ महान्वज्रो यस्याः वृत्रोऽखिल्वकर

शरणागतदीनार्त्तपरित्राणपरायणे सर्वस्यार्त्तिहरे देविनारायणिनमोस्तुते ११ हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणि कौशांभःक्षरिके देविनारायणिनमोस्तुते १२ त्रिशूलचंद्राहिधरे महावृषभवाहिनी माहेश्वरीस्वरूपेणनारायणिनमोस्तुते १३ मयूरकुक्कुटवृते महाशक्तिधरेऽनघे कौमारीरूपसंस्थानेनारायणिनमोस्तुते १४ शंखचक्रगदाशार्ङ्ग· गृहीतपरमायुधे प्रसीदवैष्णवीरूपे नारायणिनमोस्तुते १५ गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुंधरे वराहरूपिणिशिवेनारायणिनमोस्तुते १६ नृसिंहरूपेणोग्रेण हंतुंदैत्यान्कृतोद्यमे त्रैलोक्यत्राणसहितेनारायणिनमोस्तुते १७ किरीटिनीमहावज्रे सहस्रनयनोज्ज्वले वृत्रप्राणहरे चैंद्रिनारायणिनमोस्तुते १८ शिवदूतीस्वरूपेणहतदैत्यमहाबले घोररूपेमहारावेनारायणिनमोस्तुते १९ दंष्ट्राकरालवदनेशिरोमालाविभूषणे चामुंडे मुंडमथनेनारायणिनमोस्तुते २० लक्ष्मीलज्जेमहाविद्ये श्रद्धेपुष्टेस्वधेध्रुवे महारात्रिमहामायेनारा[illegible]

मीपत्वं १८ हतं दैत्यानां महाबलं यया १९ २० लक्ष्मीतिह्रस्वपाठे वकुसंमतः केचित्तु लक्ष्मीतिपठित्वा संबुद्धो श्रोणादिकृप्रत्ययांततया सिलो पह्रस्वत्वयोरभावं संबोधयंति महद्भुस्त [illegible] विद्यामहाविद्या उपानिषद्रूपेति यावत् पुष्टियुक्ता स्वधा मध्यमपदलोपी समासः स्वधापित हविर्दानमंत्रः तस्याः संबुद्धौ ध्रुवेस्थिरे महती रात्रिर्महारात्रिः द्विपरार्द्धवसानजा महाप्रलयरूपेत्यर्थः महती च अविद्या महाविद्या सा

यणिनमो[illegible]ते २१ [illegible]
मेधेसरस्वतिवरेभूतिबाभ्रवि [illegible] २२

मेधावक्तृग्रन्थधारणाशक्तिः सरस्वतीवाग्देवते वरेश्रेष्ठेभूतिः सर्वकारणेकार्योपचारान् तद्योगाद्भूतिः सात्विकीतस्याः संबुद्धौ बभ्रुशब्दे नाम्नरजोगुणोधिक्य
तद्योगात् बाभ्रवीराजसीत्यर्थः तस्याः संबुद्धौ तामसीतमोगुणवती तस्याः संबुद्धौ स्वधा एवाभूतिरुत्तरोत्तरसंपत्तिः बाभ्रवीबभ्रुवंशभवा यादवीत्यर्थः अन्यस्माद् भू
निर्दिष्टयोनिः बाभ्रवी वैष्णवी विपुलेन कुलेन विख्यातो बभ्रुनामक कपिलेत्यभिधानात् तामसी निशा तुष्टिभूतीति निद्रादसत्वादेत्वाभावः निवर्तते इति निश्चयादी विनेति यावत्
प्राचीनकर्मवाच्यावरणभावो वा तस्याः संबुद्धौ २२ २३ नोऽस्मान् हे दुर्गे दुर्यीति प्रसादने दृढिकक्तिः २४ कात्यायनि कात्यायनाश्रमभवे २५ भीतिर्भयात्
नोऽस्मान् २६ पापेभ्यः प्रतिकूलेभ्यः अनः प्राणाग्ने प्राणाग्ने इत्यादि चित्रं पितेति केचित् सुतान नमन्तीति यद्वा नोऽस्माकं पापेभ्योऽस्मान्पातु ये
मेधे सरस्वति वरे भूते बाभ्रवि तामसि नियते त्वं प्रसीदेशे नारायणि नमोऽस्तुते २२ सर्वतःपाणिपादान्ते सर्वतोऽक्षिशिरोमुखे सर्वतःश्रवणघ्राणे नारायणि न
मोऽस्तुते २३ सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तुते २४ एतत्ते वदनं सौम्यं लोचनत्रयभूषितं पातु नः सर्वभी
तेभ्यः कात्यायनि नमोऽस्तुते २५ ज्वालाकरालमत्युग्रमशेषासुरसूदनं त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तुते २६ हिनस्ति दैत्यतेजांसि स्वनेन
नापूर्य या जगत् सा घण्टा पातु नो देवि पापेभ्यो नः सुतानिव २७ असुरासृग्वसापङ्कचर्चितस्ते करोज्ज्वलः शुभाय खड्गो भवतु चण्डिके त्वां नता वयं २८
रोगानशेषानपहंसि तुष्टा रुष्टा तु कामान् सकलानभीष्टान् त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्रयतां प्रयान्ति २९ ॐ नमः परमात्मने
यद्वा अनः शकटः सुतान् येतान् पाति पापेभ्यो दुष्टेभ्यः तेन पिहितत्वात् यद्वा अनः सुतान् दुष्टः सुतानिवेत्यर्थः नसकैटिल्ये कर्तरि क्विप् २७ अलकक
धिरवसामेदः तेन स्पवसे पंके द्रवेन चर्चितो लिप्तः करोज्ज्वल इति करोज्ज्वलः २८ रोगान् उपद्रवान् अपहंसीति कुपिता तु
नः कामान् मनोरथान् अपहंसि तत्प्रयुज्यते अभीष्टान् अतिप्रियान् विपदिष्टवियोगलक्षणा विपत्तिः हीति विशेषार्थे हिशब्दो हेतौ
स्यात् विशेषार्थ एव पादपूरणे इत्यभिधानात् विशेषतो ये त्वामाश्रितास्तेऽप्यन्येषां आश्रयतां प्रयान्तीत्यन्वयः ॥२९॥ ॐ रामजी

कदनंमारणं त्वैरनेकैर्ब्रह्माणपादिलक्षणैः प्रकृत्यादित्वात् तृतीया बहुधाबहुप्रकारान् कृत्वेत्यन्वयः अन्यात्वदितराका नत्प्रकारोतिकर्तृपदेन्नी
नकापीतियावत् ३० विद्यासुइन्द्रजालादिलक्षणासु शास्त्रेषुवेदेतरविद्यास्थानेषुविवेकस्तत्वसाक्षात्कारः तंदीपयंतिबोधयंतीतिविवे
कदीपा वेदांतास्तेषु आद्येषुवाक्येषुकर्मकांडेषु तेषामुपनिषद्भ्यः प्राचीनत्वात् यद्वा आद्येषुवाक्येषुवेदेषु किंभूतेषुविवेकदीपेषुज्ञा
नप्रकाशेषु ममत्वगर्त्तेइवगर्तोममत्वाश्रयः संसारइत्यर्थः तस्मिन्नतिमहत्यनादिकालविशेषणं महांधकारे एतेषुविद्यादिषुपदा
र्थेषुएतद्विश्वंत्वदन्याकाविभ्रामयति पुनःपुनः प्रवर्त्तयतिकिंतुत्वमेवविभ्रामयसीत्यन्वयः तत्रापूर्वकत्वात् सानुबंधापिनदोषःसुग

एतत्कृतंयत्कदनंत्वयाद्यधर्मद्विषांदेविमहासुराणां त्वैरनेकैर्बहुधात्ममूर्त्तिंकृत्वांविकेतत्प्रकरोतिकान्या ३० विद्यासुशास्त्रेषुवि
वेकदीपेष्वाद्येषुवाक्येषुचकात्वदन्या ममत्वगर्त्तेतिमहांधकारेविभ्रामयत्येतदतीवविश्वं ३१ रक्षांसियत्रोग्रविषाश्चनागा यत्रारयोद
स्युबलानियत्र दावानलोयत्रतथाब्धिमध्येतत्रस्थितात्वंपरिपासिविश्वं विश्वात्मिकाधारयसीतिविश्वं विश्वेशवंद्याभवतीभवंतिविश्वा
श्रयायेत्वयिभक्तिनम्राः ३३ देविप्रसीदपरिपालयनोरिभीतेर्नित्यंयथासुरवधादधुनैवसद्यः पापानिसर्वजगतांप्रशमंनयाशु उत्पात
पाकजनितांश्चमहोपसर्गान् ३४ प्रणतानांप्रसीदत्वंदेविविश्वार्तिहारिणी त्रैलोक्यवासिनामीड्येलोकानांवरदाभव ३५

बाममत्वगर्त्तेसंसारेयेविद्यादयः पदार्थास्तेषुभ्रमानमन्यत् ३१ नागाःसर्प्पाः दस्युबलानिचौरसैन्यानि दावानलोवनाग्निः ३२
विश्वात्मिकासर्वस्वरूपा इतीदंप्रकाशनार्थंविश्वेशवंद्याब्रह्मादिभिःपित्याववतीत्वं येत्वयिभक्तिनम्राः तेविश्वाश्रयाभवंतीत्यन्वयः ३३ नोस्मा
नरिभीतेः शत्रुभीतेः शत्रुबलात् अधुनासंप्रतिसद्यस्तत्क्षणात् शममुपशमं उत्पाताश्चनिर्घातश्चकोल्कापातादयः तेषांपाकःफलपरि
णामस्तस्माज्जनितान् महोपसर्गान् नरकादिलक्षणान् ३४ ईड्येस्तव्ये ३५ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ 

वरोऽभीप्सितोर्थः हे सुरगणाः वृणुध्वं प्रार्थयत यदित्सव्ययं यत्तद्वं वरमित्यर्थः यमिति वा पाठः ३९ वैवस्वतमन्वंतरे वैवस्वतमनोरधिकारोपल
क्षिते काले सप्तमे मन्वंतरे इत्यर्थः अष्टाविंशतिमे अष्टाविंशतिसंख्ये अपवादविषये क्वचित् उपसर्गस्यापि समावेश इत्यमरः अष्टाविंशतितया मी
यते संख्यायते इति वा युगे चतुर्युगे ३८ वैप्रचित्तान् विप्रचित्तिवंशजान् ४० रक्ता लोहिताः ४१ शतवर्षमवा शतवार्षिकी उत्तरपदवृद्धिः अनेभसि वा

देव्युवाच वरदाहं सुरगणा वरं यन्मनसेच्छथ तं वृणुध्वं प्रयच्छामि जगतामुपकारकं ३६ देवा ऊचुः सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरी
एवमेव त्वया कार्यमस्मद्वैरिविनाशनं ३७ देव्युवाच वैवस्वतेंतरे प्राप्ते अष्टाविंशतिमे युगे शुंभो निशुंभश्चैवान्यावुत्पत्स्येते महासुरौ ३८ नंदगो
पगृहे जाता यशोदागर्भसंभवा ततस्तौ नाशयिष्यामि विंध्याचलनिवासिनी ३९ पुनरप्यतिरौद्रेण रूपेण पृथिवीतले अवतीर्य हनिष्यामि वै
प्रचित्तांस्तु दानवान् ४० भक्षयंत्याश्च तानुग्रान् वैप्रचित्तान्महासुरान् रक्ता दंता भविष्यंति दाडिमीकुसुमोपमाः ४१ ततो मां देवताः स्वर्गे मर्त्यलो
के च मानवाः स्तुवंतो व्याहरिष्यंति सततं रक्तदंतिकां ४२ भूयश्च शतवार्षिक्यामनावृष्ट्यामनंभसि मुनिभिः संस्तुता भूमौ संभविष्याम्ययोनिजा ४३
ततः शतेन नेत्राणां निरीक्षिष्यामि यन्मुनीन् कीर्त्तयिष्यंति मनुजाः शताक्षीमिति मां ततः ४४ ततोहमखिलं लोकमात्मदेहसमुद्भवैः भ
रिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः ४५ शाकंभरीति विख्यातिं तदा यास्याम्यहं भुवि अत्रैव च वधिष्यामि दुर्गमाख्यं महासुरं ४६ दुर्गा देवी
ति विख्यातं तन्मे नाम भविष्यति यदारुणाख्यस्त्रैलोक्ये पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले ४ रक्षांसि भक्षयिष्यामि मुनीनां त्राणकारणा
त् तदा मां मुनयः सर्वे स्तोष्यंत्यानम्रमूर्तयः ४८ भीमादेवीति विख्यातं तन्मे नाम भविष्यति यदारुणाख्यस्त्रैलोक्ये महाबाधां करिष्यति
तदाहं भ्रामरं रूपं कृत्वासंख्येयषट्पदं त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरं ५० भ्रामरीति च मां लोकास्तदा स्तोष्यंति सर्वतः इत्थं यदा
यदा बाधा दानवोत्था भविष्यति ५१ तदा तदावतीर्याहं करिष्याम्यरिसंक्षयं इति श्री नारायणीस्तुतिः एकादशोध्यायः ११ रामः

नादिजलशून्यायां भूमौ ४२ यत्तद्यस्मात् ततस्तस्मात् ४३ भरिष्यामि हे सुराः आवृष्टिपर्यंतं ४४ ४५ अत्रैवस्मिन्नाट्यरूपां दुर्गमाख्यं दुर्गनामानं ४६ भीमं भयंकरं ४७ ४८ अ
रुणोऽहिणीयस्य सः अरुणाख्यः अरुणाख्य इति वा पाठः अरुणानामेत्यर्थः ४९ भ्रामरं भ्रमरसमूहात्मकं असंख्येया अगणनीयाः षट्पदाः भ्रमरा यस्मिंस्तद्रूपेण तत् ५० स

सप्तशती टीकायां एकादशोऽध्यायः ११

दु॰टी
१०

एभिर्मधुकैटभवधादिलक्षणैः समाहितो नमन्यमानाः १ एभिरित्युक्रमेण विशेषं निर्दिशति मधुकैटभेति २ अष्टम्यामित्यादिमुख्यकालकथनं ३ ४ ५ परमुत्कृष्टं स्वस्तिकल्याणं ।
स्वायनं मार्गः स्वस्त्ययनं महत्स्विनाशरहितं स्विवर्द्धितिपाठे हितं ततोनन्तमाहात्म्यकर्म सम्यक् ६ उपसर्गान् महामारी समुद्भवान् महामारीमहानत्ययः एतदेव सम्यक् ३ ६ बोजन्मेष्वा
मुपसर्गाणामुत्पातमनुग्रहं त्रिविधं दिव्यान्तरिक्षभूमिभेदात् आधिदैवकाधिभौतिकाध्यात्मिकभेदात् त्रिविधं अपि दैवकवज्रादि आधिभौतिकं तस्करादि आध्यात्मिकं
तादि रोकादि च माहात्म्यकरं ७ सम्यक् पाठावधारणेन न विमोक्ष्यामि ८ बलिप्रदाने पश्वादि उपहारो पूजा कने पूजा पार्श्वगंधादिना अर्चने अग्निकार्ये होमे हवने मह
त्सवे विवाहादौ उच्चार्यं पठनीयं ९ जानता विधिज्ञेन अजानता तदन्येन तथा तेन प्रकारेण विधिना अर्थः बलिना पूजा बलिसहिता पूजा तां प्रतीच्छिष्यामि प्रतीच्छामि मन्माहात्म्यं येथा
देवुवाच एभिः स्तवैश्च मां नित्यं स्तोष्यति यः समाहितः तस्याहं सकलां बाधां नाशयिष्याम्यसंशयं १ मधुकैटभनाशं च महिषासुरघातनं कीर्तयिष्यन्ति ये तद्वद्वधं शुम्भनिशुम्भयोः २
अष्टम्यां च चतुर्दश्यां नवम्यां चैकचेतसः श्रोष्यन्ति चैव ये भक्त्या मम माहात्म्यमुत्तमं ३ न तेषां दुष्कृतं किंचिद् दुष्कृतोत्था न चापदः भविष्यन्ति न दारिद्र्यं न चैवेष्टवियोजनं ४
शत्रुतो न भयं तस्य दस्युतो वा न राजतः न शस्त्रानलतोयौघात् कदाचित्संभविष्यति ५ तस्मान्ममैतन्माहात्म्यं पठितव्यं समाहितैः श्रोतव्यं च सदा भक्त्या परं स्वस्त्य
नं महत् ६ उपसर्गानशेषांस्तु महामारीसमुद्भवान् तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम ७ यत्रैतत्पठ्यते सम्यङ् नित्यमायतने मम सदा न तद्विमोक्ष्यामि सान्निध्यं तत्र मे
स्थितं ८ बलिप्रदाने पूजायामग्निकार्ये महोत्सवे सर्वं ममैतच्चरितमुच्चार्यं श्राव्यमेव च ९ जानताजानता वापि बलिपूजां तथा कृतां प्रतीच्छिष्याम्यहं प्रीत्या वह्नि
शरत्काले महापूजा क्रियते या च वार्षिकी तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः ११ सर्वबाधाविनिर्मुक्तो धनधान्यसमन्वितः मनुष्यो मत्प्रसादेन भविष्यति न संशयः १२ श्रुत्वा
ममैतन्माहात्म्यं तथा चोत्पत्तयः शुभाः पराक्रमं च युद्धेषु जायते निर्भयः पुमान् १३ रिपवः संक्षयं यान्ति कल्याणं चोपपद्यते नन्दते च कुलं पुंसां माहात्म्यं मम शृण्वतां १४ शा
न्तिकर्मणि सर्वत्र तथा दुःस्वप्नदर्शने ग्रहपीडासु चोग्रासु माहात्म्यं शृणुयान्मम १५ उपसर्गाः शमं यान्ति ग्रहपीडाश्च दारुणाः दुःस्वप्नं च नृभिर्दृष्टं सुस्वप्नमुपजायते १६ बाल
ग्रहाभिभूतानां बालानां शान्तिकारकं संघातभेदे च नृणां मैत्रीकरणमुत्तमं १७ दुर्वृत्तानामशेषाणां बलहानिकरं परं रक्षोभूतपिशाचानां पठनादेव नाशनं १८ सर्वं ममैत
न्माहात्म्यं मम सन्निधिकारकं पशुपुष्पार्घ्यधूपैश्च गन्धदीपैस्तथोत्तमैः १९ विप्राणां भोजनैर्होमैः प्रोक्षणीयैरहर्निशं अन्यैश्च विविधैर्भोगैः प्रदानैर्वत्सरेण या ॥ २॰॥ ४
महापूजा दुर्गोत्सवरूपा वार्षिकी प्रतिवर्षंभवा ११ १२ उत्पत्तयः इतिच्छेद समायान्तकर्माणि प्रथमा ममैतन्माहात्म्यं तथा उत्पत्तयः पञ्चप्रकृतयः शुभास्ते ते ति साध्या इत्यन्वय इति कश्चित् १३ आ
नन्दते वर्धते कुलं वंशः १४ शान्तिकर्म तत्पुप सर्गादि निवर्तने दुःस्वप्नोऽशुभसूचकः स्वप्नः उग्रासु तीव्रविपाकासु ग्रहपीडासु बुधादिकृत तीव्रपाकेषु १५ १६ बालग्रहा मातृ
कादयः संघात भेदे मैत्रीविघटने १७ १८ अर्घः अर्घ्यः अयं दूर्वाकुशाग्रादिसंयुक्तं तिलानि च यवाः सिद्धार्थं कुंभं गंधः प्रकीर्तितः १९ प्रोक्षणीयैः स्नानादि
स्नानजलेन ब्राह्मणायोपः पश्वाद्यैः वत्सरेणाया मे प्रीतिः क्रियते साऽस्मिन् सकृदुच्चरिते सकृदेकवारं श्रुते तत्र क्रियते इत्यर्थः सकृदुच्चारितेति पाठः ॥ २॰॥ ॥ ३

तयाचास्मिन्माहात्म्येउत्तचरित्रेपठिते २१ जन्मनाम वन्नाराणां २२ २३ शुभांमतिंमोक्षाभ्युदयसाधनज्ञानंप्रांतैर्दूरमूल्नमार्गे २४ शून्येनिर्जनप्रदेशे २५ कुद्धेन
चेति वासमुच्चये वध्यामाये: च्चापूर्णित: आकुलित: पोतेनात्सुसे: २६ २७ संकटात्दुस्तरात्दु:खात्मुच्येतकर्मकर्तर्यात्मनेपदम् २८ चंडोदारुणोविक्रमो
यस्या २९ पपपतामित्पनादेपष्टी निरातंका: निर्भया: ३० ३१ शेषा: दैत्याइत्यर्थ: ३२ संभूयकायमादाय ३३ विज्ञानंविषिष्टंज्ञानंमोक्षोपयोगिज्ञानइत्यन्वय:

प्रीतिर्मेक्रियतेसास्मिन्सकृदुत्तचरितेश्रुते श्रुतंहरतिपापानितथारोग्यंप्रयच्छति २२ रक्षांकरोतिभूतेभ्योजन्मनांकीर्तनंमम युद्धेषुचरितंजन्मेदु
ष्टदैत्यनिवर्हणं २२ तस्मिन्श्रुतेवैरिकृतंभयंपुंसांनजायते युष्माभि: स्तुतयोयाश्चयाश्चब्रह्मर्षिभि: कृता: ब्रह्मणाचकृतास्तास्तुप्रयच्छंतिशुभां
मति अरण्येप्रांतरेवापिदावाग्निपरिवारित: २४ दस्युभिर्वावृत: शून्येगृहीतोवापिशत्रुभि: सिंहव्याघ्रानुयातोवावनेवावनहस्तिभि: २५ राज्ञा
कुद्धेनचाज्ञप्तोवध्योबंधगतोपिवा आघूर्णितोवावातेनस्थित: पोतेमहार्णवे २६ पतत्सुचापिशस्त्रेषुसंग्रामेभृशदारुणे सर्वाबाधासुघोरासुवेदनाभ्य
र्दितोपिवा २७ स्मरन्ममैतच्चरितंनरोमुच्येतसंकटात् ममप्रभावात्सिंहाद्यादस्यवोवैरिणस्तथा २८ दूरादेवपलायंतेस्मरतश्चरितंमम ऋषिरुवा
च इत्युक्त्वासाभगवतीचंडिकाचंडविक्रमा २९ पश्यतामेवदेवानांतत्रैवांतरधीयत तेपिदेवानिरातंका: स्वाधिकारान्यथापुरा ३० यज्ञभाग
भुज: सर्वेचक्रुर्विनिहतारय: दैत्याश्चदेव्यानिहतेशुंभेदेवरिपौयुधि ३१ जगद्विध्वंसिनितस्मिन्महोग्रेतुल्यविक्रमे निशुंभेचमहावीर्ये
शेषा: पातालमाययु: ३२ एवंभगवतीदेवीसानित्यापिपुन:पुन: संभूयकुरुतेभूपजगत: परिपालनं ३३ तयैतन्मोह्यतेविश्वंसैवविश्वंप्रसू
यते सायाचितावविज्ञानंतुष्टाऋद्धिंप्रयच्छति ३४ व्याप्तंतयैतत्सकलंब्रह्मांडंमनुजेश्वर महाकाल्यामहाकालेमहामारीस्वरूपया ३५ सैवका
लेमहामारीसैवसृष्टिर्भवत्यजा स्थितिंकरोतिभूतानांसैवकालेसनातनी ३६ भवकालेनृणांसैवलक्ष्मीर्वृद्धिप्रदागृहे सैवाभावेतथालक्ष्मीर्विना
ऋद्धिमैश्वर्यंतद्वाक्यऋद्धिमितिविवक्षावशाद्विसंधि ३४ व्याप्तंवैभवेनमहतोब्रह्मादीन्कल्पयतिअधिकारेषुप्रवर्त्तयतिइतिमहाकालीतया महाकालेप्रलये
महतीमारिसंहारक्रियातत्स्वरूपया ३५ कालेमहप्रलयेलक्षणेमहतोमारयातिइतिमाहामारीअजाजन्मरहिताकालेस्थितिसमयेसनातनीविनाशरहिता ३६
भवकालेसंपत्समयेवृद्धिप्रदेतिलक्ष्मीविशेषणं अभावेविपत्काले। ३७ ।। राम राम राम ।। ३८ इतिद्वादशोध्याय: १२ ममम

१तयैवेति मत्तुल्यये विद्यामोहोपयोगित्वानं क्रियतेप्रबोधाने तंसुरथःवैश्यः समाधिः अन्येचविवेकिनःतयैवमोहंतंतइत्यन्वयः एषैवेशष्डइतिवापाठः २ मोहं
तेसंप्रतिमोहिताःप्राक् मोहमेष्यंतिपश्यात् तेवेत्येवकारोयस्मादर्थे उपेहीतिउपपूर्वस्येगोरूपं ३ भोगःऐहिकः स्वर्गानुभवःपारत्रकःअपवर्गःकायद्व
यापायःतस्यमेधसोमुने ४ संक्षिप्रमन्त्रीनियमंनिर्विसाद्गुःखाकुलःममत्वममत्त्वाध्यवसायः ५ सद्यस्तत्प्रणोत् नद्याःपुलिनेकारगाजलय्यो
स्तांसंपूजिताःपुष्पैर्गंधधूपादिभिस्तथा इवमितिविंतंपुश्चाश्रमतिंधर्मेतथाशुभां ३८ इतिद्वादशोध्यायः १२ ऋषिरुवाच एतत्तेकथितंभूपदेवी
माहात्म्यमुत्तमं एवंप्रभावासादेवीययेदंधार्यतेजगत् विद्यातथैवक्रियतेभगवन्विष्णुमायया तयात्वमेषवैश्यश्चतथैवान्येविवेकिनः २ मोहंते
मोहिताश्चैवमोहमेष्यंतिचापरे तामुपैहिमहाराजशरणंपरमेश्वरीं ३ आराधितासैवनृणांभोगस्वर्गापवर्गदा ४ मार्कंडेयउवाच इतितस्यव
चःश्रुत्वासुरथःसनराधिपः प्रणिपत्यमहाभागंतमृषिंसंशितव्रतं ५ निर्विण्णोतिममत्वेनराज्यापहरणेनच जगामसद्यस्तपसेसचवैश्योमहा
मुने ६ संदर्शनार्थमंबायानदीपुलिनसंस्थितः सचवैश्यस्तपस्तेपेदेवीसूक्तंपरंजपन् तौतस्मिन्पुलिनेदेव्याःकृत्वामूर्तिंमहीमयीं अर्हे
णांचक्रतुस्तस्याःपुष्पधूपाग्नितर्पणैः ८ निराहारौयताहारौतन्मनस्कौसमाहितौ ददतुस्तौबलिंचैवनिजगात्रासृगुक्षितं ९ एवंसमारा
धयतोस्त्रिभिर्वर्षैर्यतात्मनोः परितुष्टाजगद्धात्रीप्रत्यक्षंप्राहचंडिका १ देव्युवाच यत्प्रार्थ्यतेत्वयाभूपत्वयाचकुलनंदन मत्तस्तत्प्राप्यतांसर्वंप

जेनतिकूलेसंस्थितः ६ देवीसूक्तंदेवीमाहात्म्यंवाचकप्रायं ७ अर्हणांपूजांनिराहारौत्याहारौत्अल्पाहारौ ८ बलिमुपहारंनिजगात्रासृजास्वदेह
शोणितेनउक्षितंप्रोक्षितं यतात्मनोर्निर्जितचित्तयोः ९ प्रत्यक्षमितिक्रियाविशेषणम् १ मत्तोमत्सकाशात् प्राप्यतांस्वीक्रियतांअविभ्रंशिविं
विच्युतिहीनम् ११

अत्रास्मिन्जन्मनि हत्तैशत्रुबलबन्नराज्येहानेवहलवेदनं १२ ममेत्यत्वीयेस्वीयाभिमानः अहमित्यनात्मन्यात्माभिमानः इतिशब्दप्रदर्शने ईदृशोयः संमलस्य
विच्युतिकारकमितिज्ञानविशेषणं एवंविधाज्ञानप्रार्थनायांहेतुमाह निर्विण्णमानसइतिविरक्तचित्तत्वादित्यर्थः तथाप्युक्तप्रतात्रज्ञानंतयाचस्तौति
प्राप्तःताव्रणोदिस्त्रुतेोस्त्र्यतेकिंप्रययाकरिष्यामीयत्लोकइतिएतैरवयतोत्तानमुदितियेनापमर्जयेनेतथाचमहाभारते ज्ञानादिबद्धिवैराग्यमलवपाभि
मिति अहोभिदिने: १३ नतराज्येनवातवलितेभविष्यतीतिअर्थः अपाब्दपवायनिषेधेनत्वनेनइत्यभिधानात् भूयः पश्चात् ॥१४॥तोनमः परमात्म
श्रीमार्कंडेयउवाच ततोवव्रेनृपोराज्यमविभ्रंशपत्यजन्मनि अत्रैवचनिजंराज्यंहतशत्रुबलंबलात् १२ सोपिवैश्यस्ततो [illegible] तोज्ञानंवव्रेनिर्विण्णमान
मानसः ममेत्यहमितिप्राज्ञः संगविच्युतिकारकं देव्युवाच स्वल्पैरहोभिर्नृपतेस्वराज्यंप्राप्स्यसेभवान् हत्वारिपूनस्खलितंतवतत्रभविष्यति १४
मृतश्चभूयःसंप्राप्यजन्मदेवाद्विवस्वतः सावर्णिकोमनुर्नामभवान्भुविभविष्यति १५ [illegible] वैश्यवर्ययत्वयायश्चवरोस्मत्तोभिवांछितः तंप्रयच्छामिसंसिद्ध्यै
तवज्ञानंभविष्यति १६ मार्कंडेयउवाच इतिदत्वातयोर्देवीयथाभिलषितंवरं बभूवांतर्हितासद्योभक्त्यातामभिष्टुता १७ एवंदेव्यावरंलब्ध्वा
ध्वासुरथः क्षत्रियर्षभः सूर्याज्जन्मसमासाद्यसावर्णिर्भवितामनुः १८ इतिश्रीमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येसुरथवैश्ययोर्वर
वैश्यवर्यवैश्यश्रेष्ठः १५ संसिद्ध्यैमोक्षाय १६ देव्याइत्यपाठेनेपंचमी १७ सूर्याज्जन्मसमासाद्यसावर्णिर्भवितामनुरितिवाक्यशेषः सचमनुरष्टममन्वंतराधि
पोभवितोभविष्यतीत्यर्थः सावर्णिर्भवितामनुरितिपुनरावृत्तिः समाप्तिद्योतयति १८ अनुष्टुभाश्चात्रदेवीमाहात्म्येत्रयोविंशत्यधिकषट्शतानिभवंति
तथाहिप्रथमेध्यायेनवसप्ततिश्लोकाः द्वितीयेऽष्टषष्टिः एकचत्वारिंशत्तृतीये चतुर्थेपंचाशत् पंचमेनवसप्ततिः षष्ठेविंशतिः सप्तमेसार्द्धैकषष्टिः नव
मेनवत्रिंशत् दशमेसार्द्धसप्तविंशतिः एकादशेपंचपंचाशत् द्वादशेऽष्टात्रिंशत् त्रयोदशेसार्द्धसप्तदश मार्कंडेयउवाचेतिमधुकैटभवधादिनिबंधनेश्लोका
ईमृतविंशतिरित्येवंत्रयोविंशत्यधिकषट्शतानि पाठ्यशतत्र्यवहाराल्लघुषट्शताधिकमयेवोपपद्यतेइत्यलं तथाहि नेदात्रयोवसुभवेःकुवेदवाक्यं
शतेनदेवीपश्चावानाश्रितः सार्द्धशाणांककोलानदाग्रयः सार्द्धेनसाश्रितेश्वपंचेमेषवः सार्द्धगजाग्रयोऽव्दाश्चत्र्यध्यसोयदागराः क्रमेणत्र्यध्या

चं.टी.
३९

ध्यायपूर्वाचार्यनिबंधनस्तसार्द्धकवचंनाद्दिनि चंडिमाने इत्थंत्रयोविंशतिमतिमप्रयुक्तात्सनुष्टुभांचरुकथितादशाभ्यां देवीमाहात्म्यतात्पर्यटीकादुर्गावबोधिनी १
श्रीचतुर्भुजमिश्रेणग्रंथैर्व्योमरसानलैः १ वेदामरविधोशाकेकारि दुर्गावबोधिनी दुर्गाभक्तिविधानेन कृतितास्तामियंबुधैः २ इतिश्रीचतुर्भुजमिश्रवि
विरचितायांदेवीमाहात्म्यतात्पर्यटीकायांसुबोधिन्यांसमाप्तमिति॥ संवत् १८२६ फाल्गुणसुदिपंचमीरविवार शुभंभूयात्सर्वजगताम्॥

देवीभक्तसुधारणिवेवायवीर्येतत्वे मधुकैटभवधश्चैवमहिषासुरसैन्यकं शक्रादिकस्तुतिश्चैवदूतसंवादएवच शुंभराजवधश्चैवनारायणीफ
लस्तुतिः स्यर्द्धपाठस्त्रयंप्रोक्तः सर्वकामफलप्रदः स्यर्द्धपाठेनरहितेनवपाठफलंभवेत् २ इतिसार्द्धनवपाठप्रमाणं। प्रणवंपूर्वमुधृत्यमाया
बीजंततःपरं मायाकामंतथाक्रोधंतारंवाग्भवसंयुतम् दीर्घमोहंततःपश्चात्कीलयेत्त्रिभिर्वदेत् १ ॐह्रींक्लींग्लौंक्लींऐंह्रोंभयमोहय
उत्कीलयउत्कीलयउत्कीलयस्वाहा इतिशापमोचनम् स्यष्टोत्तरशतंजप्त्वापश्चात्सप्तशतींजपेत्॥ ॐनमोभगवतेवासुदेवाय॥ ॥

राम:
३९